अबतक छापी हुई नहीं, सो श्रीवैद्यकमलसरन गोस्वामि कोशीवालेनें हमकूं प्रसन्नतासें दिये, जो आप सालेमाबादके श्रीजीके शिष्य होये तों ए अमूल्य वस्तुकों छापके प्रगट कर जाते. यह पुस्तक वाचनेसें अनेक स्वजन मनुष्यकों सुख प्राप्त होय, (आनन्द होय), पहले धनसंतानकरके सुख होय, अंतसमयमें कल्यान होय, (मुक्ति होय) सादश श्रीवृन्दावनमें ब्रह्मचारि (गिरधारिदासजी) नें गोपालजीके कृपासें सर्वानंदकों प्राप्त भए यह अमूल्यरत्न स्वार्थ परमार्थवालेकों श्रेयस्कर है ऐसा विज्ञापनावालेका अभिप्राय है.

श्रीमन्नित्यकुंजविहारिराधाकृष्णौ विजयेतेतमाम्
॥ अथ पटलं लिख्यते ॥ कृष्णायपदमाभाष्य गो-
विंदाय ततः परम् ॥ गोपीजनपदस्यांते वल्लभाय
द्विधा विधिः ॥ १ ॥ कामबीजादिराख्यातो मनुर-
ष्टादशाक्षरः ॥ अष्टार्णश्च दशार्णश्च उक्तो मंत्रो
यथाविधिः ॥ २ ॥ शक्तिं श्रीं पूर्वकोष्टादशार्णो विं-
शतिवर्णकः ॥ स्मरं कृष्णाय ठद्वंद्वं षडर्णमनुरीरि-
तः ॥ ३ ॥ प्रणवं हृदयं कृष्णं ङेंतमुक्त्वा ततः प-
रम् ॥ तादृशं देवकीपुत्रं हुंफट्स्वाहासमन्वितम्

॥ ४ ॥ षोडशाक्षरमंत्रोऽयं गोविंदस्य समीरितः॥
श्रीमन्मुकुंदचरणं सदेति शरणं ततः ॥ ५ ॥ अहं
प्रपद्य इत्युक्तो मुकुंदोऽष्टादशाक्षरः ॥ पंचांतको
धरासंस्थो मनुर्विंदुविभूषितः ॥ ६ ॥ पिंडबीज-
मिति प्रोक्तं सर्वसिद्धिप्रदायकम् ॥ पिंडं रतिपते-
र्बीजं नमो भगवते ततः ॥७॥ नंदपुत्राय बालादि-
वपुषे श्यामलाय च ॥ गोपीजनपदस्यांते वल्लभाय
द्विधाविधिः॥८॥अनुष्टुप्स समाख्यातो गोपालस्य
जगत्पतेः ॥ गोपालायाग्निजायाय षडक्षर उदा-

हंतः ॥ ९ ॥ कृष्णगोविंदकौ ङेंतौ सप्तवर्णों मनु-
र्मतः ॥ श्रींशक्तिमाराः कृष्णाय मारः सप्ताक्षरोऽप-
रः ॥ १० ॥ क्लींग्लौंक्लींश्यामलांगाय नतिः स्याद्द-
शवर्णकः ॥ चक्रीवामनसर्गौ च मनुरेकार्णकः स्मृ-
तः ॥ ११ ॥ काममिंद्रश्च माया च लच लाछित-
मस्तकः ॥ एकवर्णो मनुः प्रोक्तः काममंत्रपुरोहि-
तः ॥ १२ ॥ एचत्पूर्वं हृषीकेशं चतुर्थ्यंतं नमःप-
दम् ॥ अष्टवर्णो मनुः प्रोक्तः सर्वेषां हृदये स्थितः
॥ १३ ॥ ऐं वाग्भवं कामवीजं च कृष्णाय सुरसुं-

दरी ॥ गोविंदं ङेयुतं चैव रमाबीजमनंतरम् ॥१४॥
दशाक्षरं ततः पश्चात्सौबीजं तदनंतरम् ॥ द्वाविं-
शत्यक्षरो मंत्रः सर्वसिद्धिप्रदायकः ॥१५॥ कामं मा-
यां च लक्ष्मीं च दशार्णं च ततः परं ॥ त्रयोदशार्णं
मंत्रं वै प्रोक्तं सर्वसमृद्धिदम् ॥१६॥ कामं लक्ष्मीं च
मायां च जयकृष्णपदद्वयम् ॥ मायां लक्ष्मीं तथा
कामं जयं देहि पदद्वयम् ॥ १७॥ चतुर्विंशत्य-
क्षरात्मा स्वाहांतो मनुरीरितः ॥ कामं पिंडं तथा
लक्ष्मीं गोपालाय ततः परम् ॥ १८ ॥ लक्ष्मीं पिंडं

तथा कामं गोविंदायपदं तथा ॥ कामं पिंडं तथा
लक्ष्मीं स्वाहांतः प्रणवादिकः ॥ १९ ॥ इति सन-
त्कुमारीये षष्ठपटलम् ॥ ॥ अथ गोपालपद्धति-
र्लिख्यते ॥ रात्रेः पश्चिमयामस्य मुहूर्तो यस्तृती-
यकः ॥ स ब्राह्म इति विज्ञेयो विहितः संप्रबोधने
॥ १ ॥ ब्राह्मे मुहूर्ते चोत्थाय स्वमूर्ध्नि श्रीगुरुं स्म-
रेत् ॥ आनंदमानंदकरं प्रसन्नं ज्ञानस्वरूपं नि-
जभावयुक्तम् ॥ योगींद्रमीड्यं भवरोगवैद्यं श्रीम-
द्गुरुं नित्यमहं नमामि ॥ १ ॥ ततः श्रीकृष्णं स्मरे-

त् ॥ नमामि राधापतिपादपल्लवं गदामि राधा-
पतिनाम निर्मलं ॥ भजामि राधापतितत्त्वमक्कि-
यं करोमि राधापतिसेवनं मुदा ॥२॥ इति
पठन् ॥ उत्थितो यथावत् ॥ ततः पृथ्वीं प्रणमेत् ॥
समुद्रमेखले देवि पर्वतस्तनमंडले ॥ विष्णुपत्नि
नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ इति पृथ्वीं सं-
प्रार्थ्य श्वासानुसारेण भूमौ पादौ विनिक्षिप्येत् ॥
शौचाचमनदंतधावनानि विधाय स्नानार्थं तीर्थे ॥३॥
गच्छेत् ॥ तत्र पाणिपादौ प्रक्षाल्याचम्य ॥ॐअद्य

श्रीकृष्णप्रीत्यर्थं तांत्रिकस्नानमहं करिष्ये इति संकल्पः ॥ शिरसः पादपर्यंतं मृदं आलिप्य निमज्ज्योन्मज्ज्य सूर्यमंडलं अवलोक्य ॥ ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे ॥ तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥ १ ॥ इति प्रार्थ्य अंकुशमुद्रया ॥ ॐ गंगे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिंधो कावेरि जलेऽस्मिन्संनिधिं कुरु ॥ इति तीर्थान्यावाह्य जले एकीकृत्य संपूज्य नमस्कृत्य मूलमंत्रं पठन्॥ निमज्ज्योन्मज्ज्य कुंभमुद्रयात्मानं

एकादशवारं मूलेनाभिषिंचेत् ॥ जलेन तिलकाच-
मने कृत्वा मूलमुच्चार्य श्रीकृष्णं तर्पयामि ॥ इत्यंज-
लित्रयेण तर्पयेत् ॥ तीरमागत्य शुद्धे वाससी मूल-
मंत्रेण प्रोक्ष्य धेनुमुद्रां प्रदर्श्य परिधाय मूलमंत्रेण
द्वादश तिलकान् कृत्वा तांत्रिकीं संध्यां कुर्यात् ॥
ॐ नम इति दक्षिणहस्तेन जलमादाय वामेनाच्छा-
द्य मूलमंत्रेण त्रिवारं अभिमंत्र्य पिबेत् ॥ त्रिराचम्य
पुनः दक्षिणहस्तेन जलमादाय वामेनाच्छाद्य मू-
लमंत्रेण सकृदभिमंत्र्य तज्जलं वामहस्ते निक्षिप्य

तदंगुलिविवरजलबिंदुभिः शिरसि प्रोक्षयेत् ॥ पुनस्तथैव जलमादाय वामेनाच्छाद्य सकृदभिमंत्र्य दक्षिणनासारंध्रेणाघ्राय तज्जलं शरीरांतर्गतं तेन सर्वं कलुषमाक्षालितं तत्कृष्णावर्णं भूत्वा वामनाड्या निर्गतं हस्ते आगतं विभाव्य वामभागे कल्पितवज्रशिलायां अस्त्राय फट्॥इतिमंत्रेणास्फालयेत् ॥ ततो मंत्रांते सूर्यमंडलस्थाय श्रीकृष्णाय इदमर्घ्यं समर्पयामि इत्यंजलित्रयं दद्यात् ॥ ततो गायत्रीं जपेत् ॥ ॐगोपालाय विद्महे गोपीवल्ल-

भाय धीमहि ॥ तन्नः कृष्णः प्रचोदयात् ॥ ॐ गो-
पालाय अंगुष्टाभ्यां नमः॥ विद्महे तर्जनीभ्यां न-
मः ॥ गोपीवल्लभाय मध्यमाभ्यां नमः ॥ धीमहि
अनामिकाभ्यां नमः ॥ तन्नः कृष्ण कनिष्ठिकाभ्यां
नमः ॥ प्रचोदयात् करतलपृष्ठाभ्यां नमः ॥ इति
करन्यासः ॥ ॐ गोपालाय हृदयाय नमः ॥ विद्महे
शिरसे स्वाहा ॥ गोपीवल्लभाय शिखायै वषट् ॥
धीमहि कवचाय हुं ॥ तन्नः कृष्ण नेत्रत्रयाय वौषट्
प्रचोदयात् अस्त्राय फट् ॥ इति विन्यस्य अष्टोत्तर-

शतवारं अष्टाविंशतिर्वा जपेत् ॥ इति त्रिषु कालेषु संध्याविधिः ॥ जपांते जलमध्ये अष्टदलं पद्मं लिखित्वा तत्र कामबीजं विलिख्य ॥ ॐ गुरूंस्तर्पयामि ॥ परमगुरूंस्तर्पयामि ॥ महागुरूंस्तर्पयामि ॥ अस्मद्गुरूंस्तर्पयामि ॥ नारदादिदेवर्षींस्तर्पयामि ॥ पूर्वसिद्धांस्तर्पयामि ॥ भागवतांस्तर्पयामि ॥ ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मने योगपद्मपीठात्मने नमः ॥ योगपीठात्मकं श्रीकृष्णं तर्पयामि ॥ इति कर्णिका-

नेनं हस्तौ संस्कृत्य ॥ ततः त्रितालनाराचमुष्टिद-
शदिग्बंधनाग्निप्रकारात्मरक्षणादिविदध्यात्॥ इति
आसनविधिः ॥ अथ भूतशुद्धिः ॥ श्रीकृष्णाराध-
नयोग्यतासिद्ध्यर्थं भूतशुद्धिमहं करिष्ये ॥ इति सं-
कल्प्य कच्छपीमुद्रया हृदि स्थितं दीपकलिकाका-
रं जीवज्योतिः परतेजसि लीनं विचिंत्य॥ वामकुक्षौ
कृष्णवर्णं पापपुरुषं ध्यात्वा यं इति वायुबीजेन
षोडशवारजपेन पूरकेण संशोष्य रं इति अग्नि-
बीजेन चतुःषष्टिवारजपेन कुंभकेन पापपुरुषं

दग्ध्वा वं इति वरुणबीजेन द्वात्रिंशद्वारजपेन अमृतवृष्टिं ध्यात्वा तया अमृतमयं शरीरं उत्पन्नं विचिंतयेत् ॥ इति भूतशुद्धिः ॥ अथ प्राणप्रतिष्ठा ॥ अस्य श्री प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेशा ऋषयः ॥ ऋग्यजुःसामानि छंदांसि ॥ प्राणशक्तिर्देवता आंबीजं ह्रीं शक्तिः ॥ क्रौं कीलकं प्राणप्रतिष्ठार्थे विनियोगः ॥ हृदि हस्तं दत्वा ॥ ॐ आं ह्रीं क्रौं यंरंलंवंशंषंसंहं हंसः ॥ सोहं मम प्राणाः मम इंद्रियाणि मम वाङ्मनश्चक्षुःश्रोत्रघ्राण-

चतुर्दले ॥ वंनमः॥शंनमः॥ पंनमः॥संनमः॥भ्रूमध्ये
द्विदले ॥ हंनमः ॥ क्षंनमः॥ इत्यंतर्मातृकान्यासः ॥
अंनमः ॥ ललाटे ॥ आंनमः ॥ मुखवृत्ते ॥ इंनमः ॥
दक्षिणनेत्रे ॥ ईंनमः ॥ वामनेत्रे ॥ उंनमः ॥ दक्षि-
णश्रोत्रे ॥ ऊंनमः ॥ वामश्रोत्रे ॥ ऋंनमः ॥ दक्षि-
णनासापुटे ॥ ॠंनमः ॥ वामनासापुटे ॥ ऌंनमः ॥
दक्षिणगंडे ॥ ॡंनमः ॥ वामगंडे ॥ एंनमः ॥ ॥ १ ॥
ऊर्ध्वोष्ठे ॥ ऐंनमः ॥ अधरोष्ठे ॥ ओंनमः ॥ ऊर्ध्वदं-
तपंक्तौ ॥ औंनमः ॥ अधोदंतपंक्तौ ॥ अंनमः ॥

शिरसि ॥ अःनमः ॥ मुखे ॥३६॥ कंनमः ॥ दक्ष-
बाहुमूले ॥ खंनमः ॥ कूर्परे ॥ गंनमः ॥ मणिबंधे ॥
घंनमः ॥ अंगुलिमूले ॥ ङंनमः ॥ अंगुल्यग्रे ॥
चंमनः ॥ वामबाहुमूले ॥ छंनमः कूर्परे ॥ जंनमः ॥
मणिबंधे ॥ झंनमः ॥ अंगुलिमूले ॥ ञंनमः ॥
अंगुल्यग्रे ॥ टंनमः ॥ दक्षिणपादमूले ॥ ठंनमः ॥
जानुनि ॥ डंनमः ॥ गुल्फे ॥ ढंनमः ॥ पादांगुलि-
मूले ॥ णंनमः ॥ पादांगुल्यग्रे ॥ तंनमः ॥ वाम-
पादमूले ॥ थंनमः ॥ वामजानुनि ॥ दंनमः ॥ वाम-

गुल्फे ॥ धंनमः ॥ वामपादांगुलिमूले ॥ नंनमः ॥
वामपादांगुल्यग्रे॥ पंनमः॥दक्षपार्श्वे॥फंनमः॥पृष्ठे॥
भंनमः ॥ नाभौ ॥ मंनमः ॥ उदरे ॥ यंनमः ॥ वक्षसि
॥ रंनमः ॥ दक्षकुक्षौ ॥ लंनमः ॥ ककुदि ॥ वंनमः
वामकुक्षौ ॥ शंनमः ॥ हृदादिदक्षबाहौ ॥ षंनमः ॥
हृदादिवामबाहौ ॥ संनमः ॥ हृदादिदक्षपादपर्यंतं॥
हंनमः ॥ हृदादिवामपादपर्यंतं ॥ ळंनमः ॥ हृदादि-
जठरांतं ॥ क्षंनमः ॥ हृदादिमुखांतपर्यंतं न्यसेत्
॥ इत्यादिरूपं ॥ इतिकेवलमातृकान्यासः ॥ तत-

स्तेषु स्थानेषु सविंदुमातृकापीठं न्यसेत् ॥ ॥
अथ केशवादिमातृकान्यासस्य ॥ प्रजापतिर्ऋषिः ॥ गायत्रीच्छंदः ॥ श्रीलक्ष्मीनारायणो देवता ॥ हलो बीजानि॥ स्वरसंग्रहशक्तिः॥ देहशुद्धिपूर्वकं पुरुषार्थचतुष्टये विनियोगः ॥ अंकेशवाय कीर्त्यै नमः ॥ ललाटे ॥ आंनारायणाय कांत्यैनमः ॥ मुखवृत्ते ॥ इंमाधवाय तुष्टै नमः ॥ दक्षिण-नेत्रे ॥ ईंगोविंदाय पुष्टै नमः ॥ वामनेत्रे ॥ उंवि-ष्णवे धृत्यै नमः ॥ दक्षिणकर्णे ॥ ऊं मधुसूदनाय

शांत्यै नमः ॥ वामकर्णे ॥ ॠंत्रिविक्रमाय क्रियायै
नमः ॥ दक्षनासापुटे ॥ ॠंवामनाय दयायै नमः ॥
वामनासापुटे ॥ लृंश्रीधराय मेधायै नमः ॥ दक्षगं-
डे ॥ ॡंहृषीकेशाय हर्षायै नमः ॥ वामगंडे ॥ एंप-
द्मनाभाय श्रद्धायै नमः ॥ ओष्ठे ॥ ऐंदामोदराय ल-
ज्जायै नमः ॥ अधरे ॥ ॐवासुदेवाय लक्ष्म्यै नमः ॥
ऊर्ध्वदंतपंक्तौ ॥ औंसंकर्षणाय सरस्वत्यै नमः ॥
अधोदंतपंक्तौ ॥ अंप्रद्युम्नाय प्रीत्यै नमः ॥ शिर-
सि ॥ अःअनिरुद्धाय रत्यै नमः॥ मुखे ॥ कंचक्रिणे

जयायै नमः ॥ दक्षबाहौ ॥ खंगदिने दुर्गायै नमः ॥
कूर्परे ॥ गंशार्ङ्गिणे प्रभायै नमः ॥ मणिबंधे ॥ घं
खड्गिने सत्यायै नमः ॥ अंगुलिमूले ॥ ङंशंखिने
चंडायै नमः अंगुल्यग्रे ॥ चंहलिने वाण्यै नमः ॥
वामबाहुमूले ॥ छंमुसलिने विलासिन्यै नमः॥ कूर्प-
रे ॥ जंशूलिने विजयायै नमः ॥ मणिबंधे ॥ झंपा-
णिने विरजायै नमः ॥ अंगुलिमूले ॥ ञंअंकुशिने
विश्वायै नमः ॥ अंगुल्यग्रे ॥ टंमुकुंदाय विमदायै
नमः ॥ दक्षपादमूले ॥ ठंनंदजाय सुनंदायै नमः

जानुनि ॥ डंनंदिने स्मृत्यै नमः॥गुल्फे ॥ ढंनाराय-
णाय ऋद्ध्यै नमः ॥ अंगुलिमूले ॥ णंनरकजिते स-
मृद्ध्यै नमः ॥ अंगुल्यग्रे ॥ तंहरये शुद्ध्यै नमः॥ वा-
मपादमूले ॥ थंकृष्णाय बुद्ध्यैनमः ॥ जानुनि ॥ दं
सत्याय भुक्त्यै नमः ॥ गुल्फे ॥ धंसात्वताय सत्यै
नमः ॥ पादांगुलिमूले ॥ नंशौरये क्षमायै नमः ॥
पादांगुल्यग्रे ॥ पंपरशुरामाय रमायै नमः॥ दक्षपा-
र्श्वे ॥ फंजनार्दनाय उमायै नमः ॥ वामपार्श्वे ॥
वंभूधराय क्लेदिन्यै नमः ॥ पृष्ठे ॥ भंविश्वादिमूर्त-

ये क्लिन्नाये नमः॥ नाभौ ॥ मंवैकुंठाय वसुदायै नमः
॥ उदरे ॥ यंत्वगात्मने पुरुषोत्तमाय वसुधायै
नमः॥ वक्षसि ॥ रंअसृतात्मने बलिने परायै नमः
॥ दक्षकक्षे॥ लंमानसात्मने बलानुजाय परायणा-
यै नमः ॥ ककुदि ॥ वंमेदात्मने बलाय सूक्ष्मायै
नमः ॥वामकक्षे॥ शंअस्थ्यात्मने वृषघ्नाय संध्या-
यै नमः ॥ हृदादिदक्षहस्ते ॥ पंमज्जात्मने वृषाय
प्रज्ञायै नमः॥ हृदादिवामहस्ते ॥ संशुक्रात्मने हं-
साय प्रभायै नमः॥ हृदादिदक्षिणपादे ॥ हंप्राणा-

जानुनि ॥ डंनंदिने स्मृत्यै नमः॥गुल्फे॥ ढंनाराय-
णाय ऋद्ध्यै नमः ॥ अंगुलिमूले ॥ णंनरकजिते स-
मृद्ध्यै नमः ॥ अंगुल्यग्रे ॥ तंहरये शुद्ध्यै नमः॥ वा-
मपादमूले ॥ थंकृष्णाय बुद्ध्यैनमः ॥ जानुनि ॥ दं
सत्याय भुक्त्यै नमः ॥ गुल्फे ॥ धंसात्वताय सत्यै
नमः ॥ पादांगुलिमूले ॥ नंशौरये क्षमायै नमः ॥
पादांगुल्यग्रे ॥ पंपरशुरामाय रमायै नमः॥दक्षपा-
र्श्वे ॥ फंजनार्दनाय उमायै नमः ॥ वामपार्श्वे ॥
बंभूधराय क्लेदिन्यै नमः ॥ पृष्ठे ॥ भंविश्वादिमूर्त-

ये क्लिन्नायै नमः॥ नाभौ ॥ मंवैकुंठाय वसुदायै नमः ॥ उदरे ॥ यंत्वगात्मने पुरुषोत्तमाय वसुधायै नमः॥ वक्षसि ॥ रंअमृतात्मने बलिने परायै नमः ॥ दक्षकक्षे॥ लंमानसात्मने बलानुजाय परायणा- ये नमः ॥ ककुदि ॥ वंमेदात्मने बलाय सूक्ष्मायै नमः ॥ वामकक्षे ॥ शंअस्थ्यात्मने वृषघ्नाय संध्या- ये नमः ॥ हृदादिदक्षहस्ते ॥ षंमज्जात्मने वृषाय प्रज्ञायै नमः ॥ हृदादिवामहस्ते ॥ संशुक्रात्मने हं- साय प्रभायै नमः ॥ हृदादिदक्षिणपादे ॥ हंप्राणा-

त्मने वराहाय निशायै नमः ॥ हृदादिवामपादे ॥
लंशक्त्यात्मने विमलाय अमोघायै नमः॥हृदयाज्ज-
ठरावधि ॥ क्षंक्रोधात्मने नृसिंहाय विद्युते नमः ॥
हृदयान्मुखावधि ॥ केशवादिरयं न्यासो न्यासमा-
त्रेण देहिनां ॥ अच्युतत्वं ददात्येव सत्यंसत्यं न
संशयः ॥ इति सकलवैष्णवविद्यासु अधिकार-
संपादिककेशवादिमातृकान्यासः ॥ ॥ अथ त-
त्वन्यासः ॥ मंनमः पराय जीवात्मने नमः ॥ १ ॥
भंनमः पराय प्राणात्मने नमः ॥ इति द्वयं सकल-

शरीरे ॥ बंनमः ॥ पराय बुद्ध्यात्मने नमः ॥ फंनमः पराय अहंकारात्मने नमः ॥ पंनमः पराय मनआत्मने नमः॥ एतत्त्रयं हृदि॥नंनमः पराय शब्दात्मने नमः॥ शिरसि॥ धंनमः पराय स्पर्शात्मने नमः॥ मुखे॥ दंनमः पराय रूपात्मे नमः हृदि॥ थंनमः पराय रसात्मने नमः॥ गुह्ये॥ तंनमः पराय गंधात्मने नमः॥ पादयोः ॥ णंनमः पराय श्रोत्रात्मने नमः॥ श्रोत्रयोः॥ ढंनमः पराय त्वगात्मने नमः॥ त्वचि ॥ डंनमः पराय चक्षुरात्म-

ने नमः ॥ चक्षुषोः ॥ ठंनमः पराय जिह्वात्मने न-
मः ॥ रसनायां ॥ टंनमः पराय घ्राणात्मने नमः ॥
घ्राणयोः ॥ ञंनमः पराय वागात्मने नमः ॥ मुखे ॥
झंनमः पराय पाण्यात्मने नमः॥ हस्तयोः॥ जंनमः
पराय पादात्मने नमः ॥ पादयोः ॥ छंनमः पराय
पायुतत्त्वात्मने नमः ॥ गुदे ॥ चंनमः पराय उप-
स्थतत्त्वात्मने नमः ॥ उपस्थे ॥ ङंनमः पराय आ-
काशतत्त्वात्मने नमः ॥ मूर्ध्नि ॥ घंनमः पराय वायु-
तत्त्वात्मने नमः ॥ मुखे ॥ गंनमः ॥ परायत्तेजआ-

त्मने नमः ॥ हृदि ॥ खंनमः पराय अंब्वात्मने
नमः॥ गुह्ये ॥ कंनमः पराय पृथिव्यात्मने नमः ॥
पादयोः ॥ शंनमः पराय हृत्पुंडरीकात्मने नमः ॥
॥ १ ॥ हंनमः पराय द्वादशकलाव्याप्तसूर्यमंडला-
त्मने नमः ॥ २ ॥ संनमः पराय षोडशकलाव्या-
प्तचंद्रमंडलात्मने नमः ॥ ३ ॥ वंनमः दशकला-
व्याप्तवह्निमंडलात्मने नमः ॥ ४ ॥ एतच्चतुष्टयं
हृदि ॥ पंनमः पराय श्रीवासुदेवाय परमेष्ठ्यात्मने
नमः ॥ शिरसि ॥ यंनमः पराय संकर्षणाय पुरु-

पात्मने नमः ॥ मुखे ॥ लंनमः पराय प्रद्युम्नाय विश्वात्मने नमः ॥ हृदि ॥ रंनमः पराय अनिरुद्धाय निवृत्त्यात्मने नमः ॥ गुह्ये ॥ ळंनमः पराय नारायणाय सर्वात्मने नमः ॥ पादयोः ॥ क्षंनमः पराय नृसिंहाय कोपतत्त्वात्मने नमः ॥ सकलशरीरे ॥ इति तत्त्वन्यासः ॥ ॥ अथेंद्रियन्यासः ॥ ॐ दिग्भ्यो नमः॥श्रोत्रयोः ॥ आदित्याय नमः॥नेत्रयोः॥ वायवे नमः ॥ त्वचि ॥ वरुणाय नमः ॥ जिह्वायां ॥ अग्नये नमः॥वाचि॥इंद्रायनमः हस्तयोः॥ विष्णवे

नमः॥पादयोः ॥मित्राय नमः॥ पायौ ॥ प्रजापतये
नमः॥ गुह्ये ॥ चंद्राय नमः॥मनसि॥ ब्राह्मणे नमः
बुद्धौ॥रुद्राय नमः॥अहंकारे ॥ ईश्वराय नमः॥म-
नसि॥ चैतन्याय नमः ॥चित्ते ॥ इति इंद्रियशुद्ध्यर्थं
इंद्रियन्यासः ॥ ॐ नमो भगवते विष्णवे सर्वभूता-
त्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने
नमः ॥ इति महामंत्रेण व्यापकतया सर्वांगे न्यसे-
त् ॥ इति पीठन्यासः ॥ प्राणायामं कुर्यात् ॥ ॥
अथ मूलमंत्रन्यासः ॥ ॐ अस्य श्रीगोपालाष्टाद-

शाक्षरमंत्रस्य नारद ऋषिः ॥ गायत्रीछंदः ॥ श्रीकृष्णः परमात्मा देवता क्लींबीजं ॥ स्वाहाशक्तिः ॥ ऱ्हींकीलकं ॥ श्रीकृष्णप्रीत्यर्थे जपे विनियोगः ॥ ॐ नारदायऋषये नमः ॥ शिरसि ॥ गायत्रीछंदसे नमः॥ मुखे ॥ श्रीकृष्णदेवतायै नमः ॥ हृदये ॥ क्लींबीजाय नमः॥ गुह्ये ॥ स्वाहाशक्त्यै नमः पादयोः ॥ ऱ्हींकीलकाय नमः सर्वांगे ॥ इति ऋष्यादिन्यासः ॥ क्लींअंगुष्ठाभ्यां नमः ॥ कृष्णाय तर्जनीभ्यां नमः ॥ गोविंदाय मध्यमाभ्यां नमः ॥

गोपीजन अनामिकाभ्यां नमः ॥ वल्लभाय कनिष्ठिकाभ्यां नमः ॥ स्वाहा करतलकरपृष्ठाभ्यां नमः ॥ इति करन्यासः ॥ क्लीं हृदयाय नमः ॥ कृष्णाय शिरसे स्वाहा ॥ गोविंदाय शिखायै वषट् ॥ गोपीजन कवचाय हुं ॥ वल्लभाय नेत्रत्रयाय वौषट् ॥ स्वाहा अस्त्राय फट् ॥ अथ अक्षरन्यासः ॥ क्लीं मूर्ध्नि ॥ कृं भाले ॥ ष्णां भ्रुवोः ॥ यं नेत्रयोः ॥ गोंकर्णयोः ॥ विंनासिकयोः ॥ दां आस्ये ॥ यं कंठे ॥ गोंदोर्मूलयोः ॥ पीं हृदये ॥ जं

उदरे ॥ नं नाभौ ॥ वं लिंगे ॥ लं गुह्ये ॥ भां कट्यां ॥ यं जान्वोः ॥ स्वां गुल्फयोः ॥ हां पादयोः ॥ इति वर्णन्यासः ॥ हुं सुदर्शनाय अस्त्राय फडिति ॥ रक्षां कुर्यात् ॥ अथ प्राणायामः ॥ क्लीं इति षोडशवारं जपेत् ॥ वामनाड्या वायुं पूरयेत् ॥ पुनः चतुःषष्टिवारजपेन कुंभकं कृत्वा ॥ द्वात्रिंशद्वारजपेन रेचयेत् ॥ अथ ध्यानं ॥ फुल्लेंदीवरकांतिमिंदुवदनं बर्हावतंसप्रियं श्रीवत्सांकमुदारकौस्तुभधरं पीतांबरं सुंदरं ॥ गोपीनां नयनोत्पलार्चि-

ततनुं गोगोपसंघावृतं गोविंदं कलवेणुवादनपरं दिव्यांगभूषं भजे ॥ १ ॥ इति ध्यात्वा ॥ मानसैः पंचोपचारैः संपूज्य॥ जपं कुर्यात्॥सहस्रं अष्टोत्तर-शतं वा यथोत्साहं ॥ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं ॥ सिद्धिर्भवतु मे देव त्वत्प्रसादात्वयि स्थितिः ॥ इति जपं समर्प्य स्तुत्वा वहिः पूजां समारभेत् ॥ तत्र पात्रस्थापनं पृष्ठे हस्तप्रक्षालनपात्रं ॥ वामे कलशः ॥ दक्षिणे गंधपुष्पवस्त्रधूपादीनि ॥ वामहस्तनिकटे घंटां ॥ देवदक्षिणे

घृतदीपं वामे तैलदीपं संस्थाप्य ॥ अथ शंखस्थापनं ॥ स्वपुरतो वामभागे गंधोदकेन त्रिकोणषट्कोणवर्तुलचतुरस्रमंडलमालिख्य ॐ नमः ॥ इति गंधपुष्पाभ्यां मंडलं संपूज्य तत्र प्रक्षालिततत्त्रिपादिकां संस्थाप्य ॥ मं दशकलात्मने वह्निमंडलाय नमः ॥ इति गंधपुष्पाक्षतैस्त्रिपादिकां संपूज्य ॥ अं द्वादशकलात्मने सूर्यमंडलाय नमः ॥ इति शंखं संपूज्य मूलमंत्रेण शुद्धोदकेन शंखमापूर्य ॥ ॐ षोडशकलात्मने सोममंडलाय नमः ॥ इति शं-

खतोयं च पूजयित्वा ॥ गंगें च यमुने चैव० ॥ ती-
र्थान्यावाह्य संयोज्य संपूज्य ॥ ॐ अमृते अमृतोद्भ-
वे अमृतस्त्राविणि अमृतं स्त्रावय स्त्रावय क्रीं ॥ इति
मंत्रेण धेनुमुद्रां प्रदर्शयित्वा ॥ शंख ॥ १ ॥ चक्र ॥ २ ॥
गदा ॥ ३ ॥ पद्म ॥ ४ ॥ गरुड ॥ ५ ॥ मत्स्य ॥ ६ ॥
मुद्राः प्रदर्शयित्वा दक्षिणहस्तअनामिकांगुष्ठा-
भ्यां शंखोभयपार्श्वे धृत्वा ॥ उपरि प्रसारिततर्ज-
नी मध्यमाधृतविल्वमजयाकुसुमेन वा . शंखजलं
स्पृशन् ॥ अष्टवारं मंत्रं जपेत् ॥ ततः सूक्ष्मपा-

त्रेण शंखजलं गृहित्वा कलशे क्षिपेत् ॥ मूलेन
सकृत् आत्मानं प्रोक्ष्य सकलं पूजासाधनं च
प्रोक्षयेत् ॥ इति शंखपूजाविधिः ॥ अथ शंखद-
क्षिणे पाद्यपात्रं ॥ तत्र श्यामाक ॥ १ ॥ दूर्वा ॥२॥
अब्ज ३ ॥ विष्णुक्रांता निक्षिप्य शंखस्य उत्तरें ॥
अर्घपात्रं तत्र गंध ॥ १ ॥ पुष्प ॥ २ ॥ अक्षत
॥ ३ ॥ कुशाग्र॥ ४ ॥ तिल ॥ ५ ॥ सर्षप ॥ ६ ॥
दूर्वा ॥ ७ ॥ निक्षिपेत् ॥ शंखस्य पूर्वे आचमन-
पात्रं ॥ तत्र जातीफल ॥ १ ॥ लवंग ॥ २ ॥ कं-

कोलान्निक्षिपेत् ॥ शंखस्य पश्चिमे मधुपर्कपात्रं ॥ तत्र दधि मधु घृतं क्षिपेत् ॥ द्रव्याभावे तत्तन्नाम्ना गंधतुलसीकृताः सर्वत्र योज्याः ॥ ततः ॥ सर्वाणि पात्राणि मूलमुच्चरन् ॥ कलशजलेन पूरयित्वा गंधपुष्पैरभ्यर्च्य एकैकशो मूलेनाभिमंत्र्य किंचित् शंखांबु दत्वा ॥ धेनुमुद्रां महामुद्रां च प्रदर्शयेत् ॥ इति पादपूजनं ॥ भूमौ अष्टदलं पद्मं लिखित्वा तस्मिन् सिंहासनं न्यसेत् ॥ महापीठमंत्रेण पुष्पांजलिं दत्वा सत्यभामानंदस्वरूपं परं

धाम इति चिंतयेत् ॥ इति पीठपूजाविधिः ॥ ततः ताम्रपात्रे श्रीकृष्णस्वरूपं स्थापयित्वा पुष्पांजलिं कृत्वा पंचांगन्यासं कुर्यात् ॥ ततो मूलमुच्चार्य श्रीकृष्ण एष ते अर्घः स्वाहा ॥ इति शिरसि स्वाहा ॥ अर्घ्यं दद्यात्॥मूलमुच्चार्य श्रीकृष्ण इदं ते पाद्यंनमः ॥इति पादयोर्दद्यात् ॥ पुनः मूलमु० श्रीकृष्ण इदमाचमनीयं सुधा इति मुखे॥ पुनर्मूलमु० श्रीकृष्ण एष ते मधुपर्कः सुधा इति मुखे ॥ पुनर्मूलमु० पुनराचमनं ॥ततः शंखतोयेन स्नापयेत् ॥ अंगओं-

छनं ॥ ततो वस्त्रं यज्ञोपवीतं भूषणानि समर्पयेत्॥
गंधं पुष्पं धूपं दीपं च समर्पयेत् ॥ नैवेद्यमानीय
मूलेन प्रोक्ष्य गंधपुष्पादिनाभ्यर्च्य ॥ यं ॥ इति
वायुवीजेन अष्टवारजप्तेन नैवेद्यदोषान् संशोष्य
॥ रं ॥ इति अग्निवीजेन नैवेद्यदोषान् दग्ध्वा ॥ वं ॥
इति अमृतवीजेन नैवेद्यं अमृतमयं इति चिंतयेत्॥
धेनुमुद्रां महामुद्रां च दर्शयेत् ॥ चक्रमुद्रया संर-
क्षमूलेनाभिमंत्रयेत् ॥ॐ अमृतोपस्तरणमसि स्वा-
हा ॥ इति आपोशनं विभाव्य मूलमंत्रांते सांगाय

सपरिवाराय श्रीकृष्णाय नैवेद्यं समर्पयामीति शं-
खजलं किंचिद्दत्वा नैवेद्यपात्रं स्पृष्ट्वा वामेन विकचो-
त्पलसंनिभां ग्रासमुद्रां दर्शयेत् ॥ ॐ प्राणाय स्वा-
हा ओं अपानाय स्वाहा ॥ ओं समानाय स्वाहा ॥
ओं उदानाय स्वाहा ॥ ओं व्यानाय स्वाहा ॥ इति
पंच प्राणाहुतीश्चिंतयेत् ॥ ततो भगवते भोजनं
चिंतयेत् ॥ यथाशक्ति मंत्रं जपेत् ॥ ततः अमृता-
पिधानमसि स्वाहा ॥ इति उत्तरापोशनं दत्वा
आचमनीयेत् ॥ ततस्तांबूलार्पणं नीराजनं ॥ ततः

सजलं शंखं देवोपरि भ्रामयित्वा तज्जलेन समंताद्वर्तमानं आत्मानं च प्रोक्षयेत् ॥ ततोपराधक्षमापनं ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं यदर्चितं ॥ तत्सर्वं क्षमतां देव दीनं मामात्मसात्कुरु ॥ अपराधसहस्राणि क्रियंतेहर्निशं मया॥ तानि सर्वाणि मे देव क्षमस्व मधुसूदन ॥ इति क्षमाप्य ॥ सर्वतीर्थमयाय श्रीकृष्णपादोदकाय नमः ॥ इति गंधपुष्पाभ्यां अभ्यर्च्य तीर्थपात्रं शिरसि निधाय आधारे स्थापयेत् ॥ न तु केवलायां भूमौ ॥ वलिर्विभीषणो

भीष्मः कपिलो नारदोऽर्जुनः॥ प्रल्हादश्चांबरीषश्च
वसुर्वायुसुतः शिवः॥विष्वक्सेनोद्धवाक्रूराः सनका-
द्याः शुकादयः ॥ आयांतु वैष्णवाः सर्वे दीनोद्धर-
णतत्पराः ॥ तेभ्यो हरिपादोदकं दत्वा अन्येभ्योपि
सन्निकटस्थवैष्णवेभ्यो हरिचंदननिर्माल्यपादोदकं
विभज्य ॥ पश्चात्स्वयं निषेवेत् ॥ यथाशक्तिजपं
कृत्वा स्तोत्रपाठं कृत्वा प्रदक्षिणनमस्कारादिंकुर्या-
त् ॥ कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम ॥
अंतश्चरेण भूतानां द्रष्टासि वरदः सदा ॥२॥ यद्दत्तं

भक्तिमात्रेण पत्रं पुष्पं फलं जलं ॥ आवेदितं निवेद्यं च तद्गृहाणानुकंपया ॥ २ ॥ इति कृतं आराधनं भगवते समर्प्य यथासुखं विहरेत् ॥३॥ इति श्रीकृष्णाराधनसंक्षेपपद्धतिः ॥ ॥ अथ कवचं ॥ पुलस्त्य उवाच ॥ भगवन्सर्वधर्मज्ञ कवचं यत्प्रकाशितं ॥ त्रैलोक्यमंगलं नाम कृपया कथय प्रभो ॥ १ ॥ सनत्कुमार उवाच ॥ शृणु वक्ष्यामि विप्रेंद्र कवचं परमाद्भुतं ॥ नारायणेन कथितं कृपया ब्रह्मणे पुरा ॥ २ ॥ ब्रह्मणा कथितं

मह्यं परं स्नेहाद्ददामि ते ॥ अतिगुह्यतमं तत्त्वं ब्रह्ममंत्रौघविग्रहं ॥ ३ ॥ यद्धृत्वा पठनाद्ब्रह्मा सृष्टिं वितनुते ध्रुवं ॥ यद्धृत्वा पठनात्पाति महालक्ष्मीर्जगत्त्रयं ॥ ४ ॥ पठनाद्धारणाच्छंभुः संहर्ता सर्वतत्त्ववित् ॥ त्रैलोक्यजननी दुर्गा महिषादिमहासुरान् ॥ ५ ॥ वरदृप्तान् जघानैव पठनाद्धारणाद्यतः ॥ एवमिंद्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः ॥ ६ ॥ शिष्याय विष्णुभक्ताय साधकाय प्रकाशयेत् ॥ शठाय परशिष्याय दत्वा मृत्युमवाप्नुयात् ॥ ७ ॥

त्रैलोक्यमंगलस्यास्य कवचस्य प्रजापतिः ॥ ऋ-
षिश्छंदस्तु गायत्री देवो नारायणः स्वयं ॥ ८ ॥
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॥ प्र-
णवो मे शिरः पातु नमो नारायणाय च ॥९॥ भालं
पायान्नेत्रयुग्ममष्टार्णो भुक्तिमुक्तिदः ॥ क्लींपाया-
च्छ्रोत्रयुग्मं चैकाक्षरः सर्वमोहनः ॥ १० ॥ क्लीं
कृष्णाय सदाघ्राणं गोविंदायेति जिह्विकां ॥ गोपी-
जनपदं वल्लभाय स्वाहाननंमम ॥ ११ ॥ अष्टा-
दशाक्षरो मंत्रः कंठं पातु दशाक्षरः ॥ गोपीजनपदं

वल्लभाय स्वाहा भुजद्वयं ॥ १२ ॥ क्लींग्लौंक्लीं
श्यामलांगाय नमः स्कंधौ दशाक्षरः ॥ क्लीं कृ-
ष्णाय करौ पातु क्लीं कृष्णायांगजोऽवतु ॥ १३ ॥
हृदयं श्रीं भुवनेशि क्लीं कृष्णायस्तनौ मम ॥ गो-
पालायाग्निजाया मे कुक्षियुग्मं सदावतु ॥ १४ ॥
क्लीं कृष्णाय सदा पातु पार्श्वयुग्मं मनूत्तमः ॥ कृ-
ष्णगोविंदकौ पातु स्मराद्यो ङेयुतो मनुः ॥ १५ ॥
अष्टाक्षरः पातु नाभिं कृष्णेति द्व्यक्षरोवतु ॥ पृष्ठं
क्लीं कृष्णकं कालं क्लीं कृष्णाय द्विठांतकः ॥१६॥

सक्थिनी सततं पातु श्रींह्रींक्लीं कृष्णठद्वयं ॥ ऊरू
सप्ताक्षरः पातु त्रयोदशाक्षरोवतु ॥ १७ ॥ श्रीं-
ह्रींक्लीं यदतो गोपीजनवल्लपदं ततः ॥ भायस्वा-
हेति पायुं वै क्लींह्रींश्रीं स दशाक्षरः॥ १८॥ जानु-
नी च सदा पातु ह्रींश्रींक्लीं च दशाक्षरः॥ त्रयो-
दशाक्षरः पातु जंघे चक्रगदायुधः ॥ १९ ॥ अष्टा-
दशाक्षरो ह्रींश्रींपूर्वको विंशवर्णकः ॥ सर्वांगं मे
सदा पातु द्वारकानायको वली॥ २० ॥ नमोभग-
वते पश्चाद्वासुदेवाय तत्परं ॥ ताराद्यो द्वादशार्णो-

यं प्राच्यां मां सर्वदावतु ॥२१॥ श्रीं-ह्रींक्लीं दशवर्ण-
कः क्लीं-ह्रींश्रींषोडशाक्षरः ॥ गदाद्युदायुधो विष्णुः
समेग्निदिशि रक्षतु ॥२२॥ ह्रींश्रींदशाक्षरो मंत्रो
दक्षिणे मां सदावतु ॥ तारो नमोभगवते रुक्मिणी-
वल्लभाय च ॥२३॥ स्वाहेति षोडशार्णोयं नैर्ऋत्यां
दिशि रक्षतु॥क्लीं हृषीकेशायपदं नमो मां वारुणेवतु
॥ २४॥ अष्टादशार्णः कामांतो वायव्ये मां सदाव-
तु ॥ श्रीं मायाकामकृष्णाय गोविंदाय द्विठो मनुः
॥ २५ ॥ द्वादशार्णात्मको विष्णुरुत्तरे मां स-

दावतु ॥ वाग्भवः कामकृष्णाय ह्रीं गोविंदाय त-
तः परं ॥ २६ ॥ श्रीगोपीजनवल्लभाय स्वाहासौ
ततःपरं ॥ द्वात्रिंशदक्षरो मंत्रो मामैशान्ये सदा-
वतु ॥ २७ ॥ कालियस्य फणामध्ये दिव्यं नृत्यं
करोति तं ॥ नमामि देवकीपुत्रं नृत्यमानं तमच्यु-
तं ॥ २८ ॥ द्वात्रिंशदक्षरो मंत्रोप्यधो मां सर्वदाव-
तु ॥ क्लीं कामदेवाय विद्महे पुष्पबाणाय धीमहि
॥ २९ ॥ तन्नोनंगः प्रचोदयात् एषा मां पातु
चोर्ध्वतः ॥ इति ते कथितं विप्र सर्वमंत्रौघविग्रहं

॥ ३०॥ त्रैलोक्यमंगलं नाम कवचं ब्रह्मरूपिणं ॥
ब्रह्मेशप्रमुखाधीशनारायणमुखाच्छ्रुतं ॥३१॥ तव
स्नेहान्मयाख्यातं प्रवक्तव्यं न कस्यचित् ॥ गुरुं
प्रणम्य विधिवत्कवचं प्रपठेत्तु यः ॥ ३२ ॥ सकृ-
द्विस्त्रिर्यथाज्ञानं सोपि सर्वतपोमयः ॥ मंत्रेषु
सकलेष्वेव देशिको नात्र संशयः ॥ ३३ ॥ शतम-
ष्टोत्तरं चापि पुरश्चर्याविधिः स्मृतः ॥ हवनादीन्
दशांशेन कृत्वा तत्साधयेद्ध्रुवं ॥ ३४ ॥ यदि
स्यात्सिद्धकवचो सिद्धिरेव न संशयः ॥ मंत्रसिद्धि-

र्भवेत्तस्य पुरश्चर्यां विना ततः ॥ ३५ ॥ स्पर्द्धामू-
द्भूय सततं वाणीर्लक्ष्मीर्वसेत्ततः ॥ पुष्पांजल्यष्टकं
दत्वा मूलेनैव पठेत्सकृत् ॥३६॥ दशवर्षसहस्राणां
पूजायाः फलमाप्नुयात् ॥ भूर्जे विलिख्य गुटिकां
स्वर्णस्थां धारयेद्यदि ॥३७॥ गोरोचनाकुंकुमाभ्यां
कस्तूरीरक्तकैः पुनः ॥ कंठे वा दक्षिणे बाहौ सोपि
विष्णुर्न संशयः ॥ ३८ ॥ अश्वमेधसहस्राणि वा-
जपेयशतानि च ॥ महादानानि यान्येव प्रादक्षिण्यं
भुवस्तथा ॥३९॥ कलां नार्हंति तान्येव सकृदुच्चार-

णाद्यतः ॥ ४० ॥ कवचस्य प्रसादेन जीवन्मु-
क्तो भवेन्नरः ॥ त्रैलोक्यं मोक्षयेदेव त्रैलोक्य-
विजयी भवेत् ॥ ४१ ॥ इदं कवचमज्ञात्वा भ-
जेद्यः पुरुषोत्तमं ॥ शतलक्षं प्रजप्तोपि न मं-
त्रः सिद्धिदायकः ॥ ४२ ॥ इति श्रीसनत्कु-
मारतंत्रे त्रैलोक्यमंगलं नाम कवचं समाप्तं ॥
॥अथ सहस्रनाम लिख्यते ॥ कैलासशिखरे रम्ये
नानाद्रुमलताकुले ॥ नानापक्षिसमायुक्ते सिद्धचा-
रणसेविते ॥ १ ॥ कल्पवृक्षमहोद्यानमंडिते सम-

भूतले ॥ निविष्टं प्रणिपत्याह पार्वती प्राणवल्लभं
॥ २ ॥ श्रीपार्वत्युवाच ॥ भगवन् देवदेवेश सृ-
ष्टिस्थित्यंतकारक ॥ योगियोगिमहायोगिपूज्यपा-
दयुगांबुज ॥ ३ ॥ त्वमेव पूज्यसे लोकैर्ब्रह्मवि-
ष्णुसुरादिभिः ॥ नित्यं पठसि देवेश कस्य स्तोत्रं
महेश्वर ॥ ४ ॥ त्वत्तोऽधिकतरः को वा यमेवं स-
मुपाससे ॥ हर्षगद्गदया वाचा यन्नाम लपसे मुहुः
॥ ५ ॥ आश्चर्यमिदमाख्यातं जायते मयि शंकर॥
त्वं प्राणेश महाप्राज्ञ संशयं छिंधि शंकर ॥ ६ ॥

॥ श्रीमहादेव उवाच ॥ धन्यासि कृतपुण्यासि
पार्वति प्राणवल्लभे ॥ रहस्यातिरहस्यं च यत्पृच्छ-
सि वरानने॥७॥तत्त्वं गोपितवानस्मि स्त्रीस्वभावा-
दहं प्रिये ॥ स्त्रीस्वभावान्महादेवि पुनस्त्वं परिपृ-
च्छसि ॥८॥ गोपनीयं गोपनीयं गोपनीयं प्रयत्न-
तः ॥ दत्ते च सिद्धिहानिः स्यात् तस्माद्यत्नेन गो-
पयेत् ॥ ९ ॥ राज्यं देयं च सर्वस्वं स्वप्राणमपि
सुंदरि ॥ न च वाच्यं परं तत्त्वं गोपनीयं प्रयत्नतः
॥ १० ॥ इदं रहस्यं परमं पुरुपार्थप्रदायकं ॥ ध-

नरत्नौघमाणिक्यतुरंगमगजादिकं ॥ ११ ॥ ददाति स्मरणादेव महामोक्षप्रदायकं ॥ तस्य गोपालदेवस्य नाम्नां साहस्रमुत्तमं ॥१२॥ स्मरामि सततं देवि हर्षगद्गदया गिरा॥ अवतारा महाविष्णोर्मत्स्यकूर्मादयः कति ॥ १३ ॥ न तेषु देवदेवेशि पूर्णत्वं सुरसुंदरि ॥ अवतारो ह्ययं साक्षात्पूर्णब्रह्मसनातनं ॥ १४ ॥ वासुदेवाख्यममलं ब्रह्मादिभिरुपासितं ॥ नैनं जानंति तत्त्वेन कर्ममूढा महर्षयः ॥ १५ ॥ नारदः कपिलाचार्यो वेदव्यासः स-

नातनः ॥ अहं ब्रह्मा शुकोऽत्रिश्च वसिष्ठश्च पराश-
रः ॥१६॥ एते जानंति तत्त्वेन जपंति जगदीश्वरं॥
तद्रूपतां गता एते नामरूपक्रियादिभिः ॥ १७ ॥
तत्तेऽहं संप्रवक्ष्यामि शृणुष्वावहिता प्रिये ॥ योसौ
निरंजनो देवश्चित्स्वरूपी जनार्दनः ॥ १८ ॥ सं-
सारसागरोत्तीर्णकरणाय नृणां सदा ॥ श्रीगंगा
द्रवरूपेण त्रैलोक्यं व्याप्य तिष्ठति ॥ १९ ॥ ततो
लोका महामूढा विष्णुभक्तिविवर्जिताः ॥ निश्चयं
नाधिगच्छंति पुनर्नारायणो हरिः ॥२०॥ त्यक्त्वा

नारायणं देवमादिभूतमकल्मषं॥केचित्त्वामपरे मां च भक्तियुक्ता उपासते॥२१॥त्वत्तो मत्तश्च निखिलान्कामान्प्राप्य विमोहिताः॥अवजानंति ते मूढा नारायणमनामयं ॥ २२ ॥ निरंजनो निराकारो भक्तानां प्रीतिकामतः ॥ वृंदावनविहाराय गोपालं रूपमुद्वहन् ॥ २३ ॥ मुरलीवादनाधारी राधायै प्रीतिमावहन् ॥ अंशांशेभ्यः समुन्मील्य पूर्णरूपकलायुतः ॥२४॥ श्रीकृष्णचंद्रो भगवान्नंदगोपवरोद्यतः ॥ धरणीरूपिणी माता यशोदानंददायिनी

॥ २५॥ देवकीवसुदेवाभ्यां ध्यातस्ताभ्यां वशी-
कृतः ॥ द्वाभ्यां प्रयाचितो नाथो देवक्यां वसुदेव-
तः ॥ २६ ॥ ब्रह्मणाभ्यर्थितो देवो देवैरपि सुरेश्व-
रि ॥ देवैर्विज्ञप्त ईशानो भूमिमंडलमंडितः ॥२७॥
जातो भूभारमुद्धर्तुं पूर्णरूपकलाकुलः ॥ जातो-
ऽवन्यामपि नुतो मुरली वेदरेचिका ॥२८॥ तया-
सार्धं वचः कृत्वा ततो जातो महीतले॥संसारसार-
सर्वस्वं श्यामलं महदुज्ज्वलं ॥२९॥ एतज्ज्योति-
रहं वंद्यं चिंतयामि सनातनं ॥ एतत्प्रभावात्स-

कलं ब्रह्मांडं मद्वशे शिवे ॥ ३० ॥ गौरतेजो विना-
यस्तु श्यामतेजः समर्चयेत् ॥ जपेद्वा ध्यायते वापि
स भवेत्पातकी शिवे ॥ ३१ ॥ स ब्रह्महा सुरापी
च स्वर्णस्तेयी च पंचमः ॥ एतैर्दोषैर्विशिष्येत तेजो-
भेदान्महेश्वरि ॥ ३२ ॥ तस्माज्ज्योतिरभूद्द्वेधा रा-
धामाधवरूपकं ॥ तस्मादहं महादेवि गोपालेनैव
भाषितं ॥ ३३ ॥ दुर्वाससो मुनेर्मोहे कार्तिक्यां रास-
मंडले ॥ ततः पृष्टवती राधा संदेहं भेदमात्मनः ॥
॥ ३४ ॥ निरंजनात्समुत्पन्नं मयाधीतं जगन्मयं ॥

श्रीकृष्णेन ततः प्रोक्तं राधायै नारदाय च ॥३५॥
ततो नारदतः सर्वे विरला वैष्णवास्तथा ॥ कलौ
जानंति देवेशि गोपनीयं त्वया सदा ॥ ३६ ॥
शठाय कृपणायाथ दांभिकाय सुरेश्वरि ॥ न देयं
परशिष्याय दत्त्वा मृत्युमवाप्नुयात् ॥ ३७ ॥ तत्ते
गोपालदेवस्य नाम्नां साहस्रमुत्तमं ॥ प्रवक्ष्यामि
सुरेशानि श्रोतुं योग्यासि सुंदरि ॥३८॥ त्वया कु-
त्रापि नो वाच्यं गोपनीयं स्वयोनिवत् ॥ रहस्या-
तिरहस्यं मे प्राणादपि सुलोचने ॥३९॥ ब्रह्महत्या-

मवाप्नोति तस्माद्यत्नेन गोपयेत् ॥ ४० ॥ ॐअस्य श्रीगोपालसहस्रनामस्तोत्रमंत्रस्य ॥ श्री सदाशिवऋषिः ॥ अनुष्टुप् छंदः॥ श्रीगोपालो देवता ॥कामो वीजं॥माया शक्तिः॥ चंद्रः कीलकं॥श्रीकृष्णचंद्रभक्तिजन्यफलप्राप्तये श्रीगोपालसहस्रनामजपे विनियोगः ॥ अथ ध्यानं ॥ फुल्लेंदीवरकांतिमिंदुवदनं वर्हावतंसप्रियं श्रीवत्सांकमुदारकौस्तुभधरं पीतांबरं सुंदरं ॥ गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतं गोविंदं कलवेणुवादनपरं दिव्यां-

गभूपं भजे ॥ ४१ ॥ ॐ क्लीं देवः कामदेवश्च
कामबीजशिरोमणिः ॥ श्रीकृष्णः कृष्णचरितो
लीलाविग्रहधारकः ॥ ४२ ॥ धरणीपालको धन्यो
धनधान्यप्रवर्तकः ॥ गोविंदो गोकुलाचार्यो गोपी-
गोपमनोहरः ॥ ४३ ॥ गोवत्सपालकः स्वामी
गोपालो गोपीपालकः ॥ गोपीजनानंदकरो व-
न्हिजायानिषेवितः ॥ ४४ ॥ गजगामी गुरुर्गोप्ता
मायागंगादितीर्थसूः ॥ गंगागगनसंचारी गणेशा-
दिसुरस्तुतः ॥ ४५ ॥ गिरिशप्रणतो गौरीप्राणे-

गृहदये स्थितः ॥ गदाधरो गदहरो पोपीनां
जीवनौषधीः ॥ ४६ ॥ ग्रस्तसूर्येंदुसंजस्तो गोमा-
युकृतरक्षणः ॥ गरुडासनसंजातशर्मा गरुडसेवि-
तः ॥४७॥ गंगादितीर्थरासिको ग्रामणीर्ग्रामदाय-
कः ॥गाधीकृतजगत्सिंधुर्गोत्रशत्रुनिषेवितः॥४८॥
गोवर्धनधरो गोपकन्यावस्त्रापहारकः ॥ गोप्यो
गोपपतिर्गोप्ता गोपीपालनतत्परः ॥४९॥ गतमा-
योऽगाधबुद्धिर्गात्रसौंदर्यमंडितः ॥ गजेंद्रमोक्षदो
ग्राहस्वर्गदोऽलककौस्तुभः ॥ ५० ॥ गांधर्वगानर-

सिको गायत्रीजपतत्परः॥गंगासत्कारसंतुष्टो गांगे-
यपरिपालकः ॥ ५१ ॥ ग्रंथज्ञो ग्रंथभेत्ता च गलकौ-
स्तुभभूषणः ॥ कृपाकरः कलानाथः कामिनीमद-
भंजनः ॥ ५२ ॥ कोटिकंदर्पलावण्यकमलाकर-
लालितः ॥ कीर्तिविस्फुरिताशेषकुकुरांधकसेवितः
॥ ५३ ॥ कनकच्छायवसनः कन्याव्रतफलप्रदः ॥
कालिंदीकेलिरासिकः कालीयदमनः कृती ॥ ५४ ॥
कल्याणशीतकरतः कृतकालमधूपतिः ॥ कला-
नाथमुखः कामी कलिकल्मषनाशनः ॥ ५५ ॥

काश्मीरचर्चितः कायहीनः कामप्रदायकः ॥ किं-
किणीभूषितकटिः कौस्तुभामुक्तकंधरः ॥ ५६ ॥
कलापिपिच्छभूपायुक् कोटिसूर्यसमप्रभः ॥ कि-
शोरवयसा सेव्यः कंसप्राणापहारकः ॥५७॥ कला
पग्रामवासी च कुरुवंशविवर्धनः ॥ कमनीयवपुर्भू-
षाकलिताशेषमानसः ॥ ५८ ॥ कंठमुक्ताधरः
श्रीमान् कलापी प्रीतिकारकः ॥ कपिराजकृतासे-
वाकनकाचितभूषणः ॥ ५९ ॥ कमलच्छदलोला-
क्षः कर्मकृत्कर्मपावनः ॥ कैतवोज्झितकायश्रीः

करुणामृतसागरः ॥ ६० ॥ काश्यपीभारसंहर्ता काश्यपीपतिपूजितः ॥ कांचीपुरगतिः कामजनकः कामसुंदरः ॥ ६१ ॥ कमलालंकृतभुजः काश्मीरच्छविवस्त्रहृत् ॥ कांतारभयहृत्कांतापूजितः कांतिनिर्भरः ॥ ६२ ॥ कुंददंतः कलीसंस्थः कामचारी कुबेरजित् ॥ कार्यहीनः कार्यकर्ता कूटकार्यघनाशनः ॥ ६३ ॥ किरातीवरदः किंचित्स्मितशोभिमुखांबुजः ॥ किरातवेषो भूतेशसेवितः कल्पितप्रदः ॥ ६४ ॥ हरिर्हर्षप्रदो हेयसंसारो

हापितासुरः ॥ हलायुधानुजो हेलारसिको हतभू-
धरः ॥ ६५ ॥ हरिणीलोचनो हंसो वाहुपूज्यो हस-
न्मुखः ॥ हैयंगवीनभोक्ता च हुतभुङ्मुखतर्पितः
॥ ६६ ॥ हतसंसारदावाग्निर्हितकृद्व्रजयोपितां ॥
हीनदोषो हंसरूपो हतारिर्हरपूजितः ॥ ६७ ॥ ह-
त्याकोटिहरो हर्षी हुंकारनिहतासुरः ॥ हालापान-
प्रियो हालाशक्तो भक्तपराङ्मुखः ॥६८॥ व्रजस्त्री-
नयनानंदो व्रजस्त्रीजनजीवनः ॥ व्रजस्त्रीगीतस-
त्कीर्तिर्व्रजस्त्रीपरिपालकः ॥६९॥ व्रजस्त्रीनयनानंद-

श्चंद्रमा नंदनंदनः ॥ व्रजस्त्रीतपसा भर्ता व्रजस्त्री-
भोगलालसः ॥ ७०॥ व्रजस्त्रीरासरसिको व्रजस्त्री-
कुहकप्रदः ॥ व्रजस्त्रीभाग्यभूमीशो व्रजस्त्रीजनर-
क्षकः ॥ ७१ ॥ वृंदावनेंदुरानंदो नंदग्रामकृताल-
यः ॥ वनोपवनहेलायुग् गोवर्धनविहारभूः ॥७२॥
वृंदावनकृतावासो वृंदावननिषेवितः ॥ वृंदाव-
नकदंबेषु लास्यलीलाविनोदवान् ॥७३ ॥ वृषभा-
नुसुतास्वामी वृषभानुसुतार्चितः ॥ वृषभानुसुता-
भाग्यं वृषभानुसुताप्रियः ॥७४॥ राधिकालालि-

तपदो राधिकाकेलिलंपटः ॥ राधिकारतिसर्वस्वं राधिकाश्यामसुंदरः ॥ ७५ ॥ राधिकारासर-
सिको राधारमणतत्परः ॥ राधाकुंडकृतस्नानो रा-
धाकेलिकृतोत्सवः ॥ ७६ ॥ राधोत्संगनिषण्णांगो राधाहस्तोपजीवितः ॥ राधिकाकृतसंकेतो रा-
धामानविवर्धनः ॥ ७७ ॥ दानलीलामानलीला-
मंडनो व्रजयोषितां ॥ यशोदालालितो देवो यशोदामानसोत्सवः ॥ ७८ ॥ यशोदापोषि-
तः श्रीदो यशोदासुखभाजनः ॥ दधिदुग्ध-

हरश्चौर्यशंकितः पुष्करेक्षणः ॥ ७९ ॥ गोपीभि-
र्हसितश्चौर्ये गोपिभिः कृतहेलनः ॥ वेणुवादि-
त्रवान्वेद्यो मुरलीवाद्यतत्परः ॥ ८० ॥ मोदमान-
वपुर्मानी माननीयो महीभृतां ॥ मनोहरो महीभ-
र्ता महामोहनिवारकः ॥ ८१ ॥ मितभाषी मिता-
हारी मीनचंचललोचनः ॥ मधुपानकृतां द्रष्टा म-
धुपानकृदीश्वरः ॥ ८२ ॥ मधुक्रीडापरो मुग्धो म-
धुदैत्यनिषूदनः ॥ मथुरावनितामोही मथुरास्त्रीपु-
रंदरः ॥ ८३ ॥ मुग्धसुंदरगात्रश्रीर्मंदिरांगच्छविः

प्रभुः ॥ प्रेमहर्षमयूराणा लास्यलीलाविनोदकृत्
॥८४॥ श्रीगोपालो महीपालः सर्ववेदांगपारगः ॥
कृष्णः कमलपत्राक्षः पुंडरीकः सनातनः ॥ ८५ ॥
गोपतिर्भूपतिः शास्ता प्रहर्ता विश्वतोमुखः ॥
आदिकर्ता महाभर्ता महाकालः प्रतापवान् ॥८६॥
जगज्जीवो जगद्धाता जगद्भर्ता जगद्वसुः ॥ मत्स्यो
भीमः कुहूभर्ता हर्तावाराहमूर्तिमान् ॥८७ ॥ ना-
रायणो हृषीकेशो गोविंदो गरुडध्वजः ॥ गोकुलें-
द्रो महाचंद्रः शर्वरीप्रियकारकः ॥ ८८ ॥ कम-

लामुखलोलाक्षः पुंडरीकः शुभावहः ॥ दुर्वासाः
कपिलो भौमः सिंधुसागरसंगमः ॥ ८९॥ गोविंदो
गोपतिर्गोत्रं कालिंदीप्रेमपूरकः ॥ गोस्वामी गो-
कुलेंद्रेशो गोवर्धनवरप्रदः ॥ ९० ॥ नंदादिगोकु-
लत्राता दाता दारिद्र्यभंजनः ॥ सर्वमंगलदाता
च सर्वकामप्रदायकः ॥ ९१ ॥ आदिकर्ता मही-
भर्ता सर्वनागरसिंधुजः ॥ गजगामी गजोद्धारी
कामी कामकलानिधिः ॥ ९२ ॥ कलंकरहितश्चंद्रो
बिंबोष्ठो बिंबसत्तमः ॥ मालाकारकृपाकारः कोकि-

लस्वरभूषणः ॥ ९३ ॥ रामो लीलांवरो देवो हली
दुर्मदमर्दनः ॥ सहस्राक्षपुरीभेत्ता महामारीविना-
शनः ॥ ९४ ॥ शिवः शिवतमो भेत्ता वलारातिप्र-
पूजकः ॥ कुमारीवरदायी च वरेण्यो मीनकेतनः
॥ ९५ ॥ नरो नारायणो धीरो धीरापतिरुदार-
धीः ॥ श्रीपतिः श्रीनिधिः श्रीमान्मापतिः पतिरा-
जहा ॥९६॥ वृंदापतिः कुलग्रामी धामब्रह्मसनात-
नः ॥ रेवतीरमणो रामः प्रियश्चंचललोचनः ॥९७॥
रामायणशरीरोयं रामी रामः श्रियःपतिः ॥ शर्वरः

शर्वरी शर्वः सर्वत्र शुभदायकः॥९८॥ राधाराधयि-
तो राधी राधाचित्तप्रमोदकः ॥ राधारतिसुखोपेतो
राधामोहनतत्परः ॥ ९९ ॥ राधावशीकरो राधा-
हृदयांभोजषट्पदः ॥ राधालिंगनसंमोदो राधान-
र्तनकौतुकः ॥ १०० ॥ राधासंजातसंप्रीतो राधा-
काम्यफलप्रदः ॥ वृंदापतिः कोशनिधिः कोकशो-
कविनाशनः ॥ १ ॥ चंद्रापतिश्चंद्रपतिश्चंडकोदं-
डभंजनः ॥ रामो दाशरथीरामो भृगुवंशसमुद्भवः
॥ २ ॥ आत्मारामो जितक्रोधो मोहो मोहांधभं-

जनः ॥ वृषभानुभवो भावी काश्यपी करुणानिधिः
॥ ३ ॥ कोलाहलो हली हालो हलीहलधरप्रियः ॥
राधामुखाब्जमार्तंडो भास्करो रविजो विधुः ॥ ४॥
विधिर्विधाता वरुणो वारुणो वारुणीप्रियः ॥ रो-
हिणीहृदयानंदी वसुदेवात्मजो वली ॥ ५ ॥ नी-
लांवरो रौहिणेयो जरासंधवधोद्यतः ॥ नागोजवां
भोविरदो विरहो वरदो वली ॥ ६ ॥ गोपथो
विजयी विद्वान्शिपिविष्टः सनातनः ॥ परशुराम-
वचोग्राही वरग्राही शृगालहा ॥७॥ दमघोपोपदे-

टा च रथग्राही सुदर्शनः ॥ वीरपत्नियशस्त्राता
जराव्याधिविघातकः ॥ ८ ॥ द्वारकावासतत्त्वज्ञो
हुताशनवरप्रदः ॥ यमुनावेगसंहारी नीलांबरधरः
प्रभुः ॥ ९ ॥ विभुः शरासनो धन्वी गणेशो
गणनायकः ॥ लक्ष्मणो लक्षणो लक्षो रक्षोवंशवि-
नाशनः ॥ १० ॥ वामनो वामनीभूतो बलिजिद्वि-
क्रमत्रयः ॥ यशोदानंदकर्ता च यमलार्जुनमुक्तिदः
॥ ११ ॥ उलूखली महामानो दामोदरदयापरः ॥
भक्तानुकारी भगवान् केशवो बलधारकः ॥ १२ ॥

केशिहा मधुहा मोही वृषासुरविघातकः ॥ अघा-
सुरविनाशी च पूतनामोक्षदायकः ॥ १३ ॥ कुब्जा-
विनोदी कुब्जांगसमीकरणतत्परः ॥ अश्वमेधो वा-
जपेयो गोमेधो नरमेधवान् ॥ १४ ॥ कंदर्पकोटि-
लावण्यश्चंद्रकोटिसुशीतलः ॥ रविकोटिप्रतीकाशो
वायुकोटिमहाबलः ॥ १५ ॥ ब्रह्मा ब्रह्मांडकर्ता च
कमलावांछितप्रदः ॥ कमली कमलाक्षश्च कमला-
मुखलोलुपः ॥ १६ ॥ कमलाव्रतधारी च कमला-
क्षपुरंदरः ॥ सौभाग्याधिकचित्तोयं महामायी

महोत्कटः ॥ १७ ॥ तारकारिः सुरत्राता मारीच-
क्षोभकारकः ॥ विश्वामित्रप्रियो दांतो रामो राजी-
वलोचनः ॥ १८ ॥ लंकाधिपकुलध्वंसी विभीषण-
वरप्रदः ॥ सीतानंदकरो रामो वीरो वारिधिबंधकः
॥१९॥ चंद्रावलीपतिः कूलः केशीकंसवधोमलः ॥
माधवो मधुहा माध्वीपानकृन्नरकप्रदः ॥ २० ॥
मुंजाटवीगाहमानो धेनुकारिर्धरात्मजः ॥ वंशीवट-
विहारी च गोवर्धनवनाश्रयः ॥ २१ ॥ तथा ता-
लवनोद्देशी भांडीरवनशंकहा ॥ तृणावर्तकृपाकारी

वृषभानुसुतापतिः ॥ २२ ॥ राधाप्राणसमो राधा-
वदनाब्जमधूकरः ॥ गोपीरंजनदैवज्ञो लीलाकम-
लपूजितः ॥ २३ ॥ क्रीडाकमलसंदोहो गोपिका-
प्रीतिरंजनः ॥ रंजको रंजनो रंगो रंगी रंगमहीरुहः
॥ २४ ॥ कामः कामारिभक्तोयं पुराणपुरुषः कविः ॥
नारदो देवलो भीमो वालो वालसुखांबुजी ॥ २५ ॥
अंबुजो ब्रह्मसाक्षी च योगी दत्तवरो मुनिः ॥
ऋषभः पर्वतो ग्रामो नदीपवनवल्लभः ॥ २६ ॥
पद्मनाभः सुरज्येष्ठो ब्रह्मा रुद्रोहिभूषितः ॥

गणानां त्राणकर्ता च गणेशो ग्राहिलो ग्रही
॥ २७ ॥ गुणाश्रयो गुणक्रोधी क्रोडीकृतजगत्त्र-
यः ॥ यादवेंद्रो द्वारकेंद्रो मथुरावल्लभो धुरी ॥२८॥
भ्रमद्भ्रमरलीलाभकुंतलः कुलभूषणः ॥ कुंतीसुत-
प्राणरक्षी कुंतीसुतवरप्रदः ॥ २९ ॥ सुभद्राहरणो-
द्युक्तधनंजयनियोजकः ॥ द्रौपदीदैवतं दाता दुर्वा-
सस्त्रासिकारकः ॥ ३० ॥ यमुनावरदाता च कश्य-
पस्य वरप्रदः ॥ शंखचूडवधोद्दामी गोपीरक्षणत-
त्परः ॥ ३१ ॥ पांचजन्यकरो रामी त्रिरामी वनजो

जयः ॥ सांदीपनसुतादानसंजातगुरुदक्षिणः॥ ३२
चतुःषष्ठिकलाभिज्ञो मुचुकुंदवरप्रदः ॥ फाल्गुनः
फाल्गुनसखा विराधवधकारकः ॥३३॥ रुक्मिणी-
प्राणनाथश्च सत्यभामाप्रियंकरः ॥ सत्याजांबव-
तीभर्ता लक्ष्मणानंदकंदलः ॥ ३४ ॥ कृतनाग्नि-
जितीकामो मित्रविंदासुखप्रदः॥कल्पवृक्षो महावृ-
क्षो दानवृक्षो महाफलः ॥३५॥ अंकुशो भूपुरो
भावो भ्रामको भ्रामको हरिः ॥ सरलः शाश्वतो
धीरो यदुवंशी शिवात्मकः ॥ ३६ ॥ प्रद्युम्नबलक-

तीं च प्रहार्ता दैत्यहा प्रभुः ॥ महाधनो महावीरो
वनमालाविभूषणः ॥ ३७ ॥ तुलसीदामसौभाग्यो
जालंधरविनाशनः ॥ शूरः सूर्यो मृतंडश्च भास्करो
विश्वमूर्तितः ॥ ३८ ॥ रविस्तमोहा वन्हिश्च वाडवो
वडवानलः ॥ दैत्यदर्पविनाशी च गरुडो गरुडा-
ग्रजः ॥ ३९ ॥ गोपीनाथो महानाथो वृंदानाथ-
विरोधकः ॥ प्रपंची पंचरूपश्च लतागुल्मश्च गो-
पतिः ॥ ४० ॥ गंगा च यमुनारूपो गोदा वेत्रवती
तथा ॥ कावेरी नर्मदा तापी गंडकी सरयूरजः॥४१

राजसस्तामसः सत्वी सर्वांगी सर्वलोचनः ॥ सुदा-
मयोमृतमयो योगिनीवल्लभः शिवः ॥ ४२ ॥ बुद्धो
बुद्धिमतां श्रेष्ठो विष्णुर्जिष्णुः शचीपतिः ॥ वंशी
वंशधरो लोको विलोको मोहनाशनः ॥४३॥ रवरा-
वो रवोरावो वालो बाल्यबलांतकः ॥ शिवो रुद्रो
नलो नीलो लांगली लांगुलाश्रयः ॥ ४४ ॥ पारदः
पावनो हंसो हंसारूढो जगत्पतिः ॥ मोहनीमोहनो
माया महामायी महामखी ॥ ४५ ॥ वृषो वृषाक-
पिः कालः कालीदमनकारकः ॥ कुब्जाभाग्यप्रदो

वीरो रजकः क्षयकारकः ॥ ४६ ॥ कोमलो वारुणो
राजा जलजो जलधारकः ॥ हारकः सर्वपापघ्नः
परमेष्ठी पितामहः ॥ ४७ ॥ खड्गधारी कृपाकारी
राधारमणसुंदरः ॥ द्वादशारण्यसंभोगी शेषनागफ-
णालयः ॥ ४८ ॥ कामः श्यामः सुखः श्रीदः श्रीहः
श्रीदः पतिः कृतिः ॥ हरिर्हरो नरो नारो नरोत्तम
इषुप्रियः ॥ ४९ ॥ गोपालीचित्तहर्ता च कर्ता
संसारतारकः ॥ आदिदेवो महादेवो गौरीगुरुर-
माश्रयः ॥५० ॥ साधुर्मधुर्विधुर्धाता त्राता क्रूरप-

रायणः ॥ रोलंबी च हयग्रीवो वानरारिर्वनाश्रयः
॥ ५१ ॥ वनं वनी वलाध्यक्षो महाबंधो महामुनिः ॥
स्यमंतकमणी प्राज्ञो विज्ञो विघ्नविघातकः ॥५२॥
गोवर्धनो वर्द्धनीयो वर्द्धनी वर्द्धनप्रियः ॥ वार्द्धन्यो
वर्द्धनो वर्धी वर्द्धनः ससुखप्रियः ॥ ५३ ॥ गोपाल-
रमणीभर्ता सांबकुष्ठविनाशकः ॥ वर्द्धितो वृद्धको
वृद्धो वृंदारकजनप्रियः ॥ ५४ ॥ रुक्मिणीहरण-
प्रेमाप्रेमी चंद्रावलीपतिः ॥ श्रीकर्ता विश्वभर्ता
च नारायणनरो वली ॥ ५५ ॥ गणो गणप-

तिश्चैव दत्तात्रेयो महामुनिः ॥ व्यासो नारायणो
दिव्यो भव्यो भावुकधारकः ॥ ५६ ॥ स्वश्रेयसं
शिवं भद्रं भावुकं भविकं शुभं ॥ शुभात्मकः शुभः
शास्ता प्रशास्ता मेघनादहा ॥ ५७ ॥ ब्रह्मण्यदेवो
दीनानामुद्धारकरणक्षमः ॥ कृष्णः कमलपत्राक्षः
कृष्णः कमललोचनः ॥ ५८ ॥ कृष्णः कामीसदा-
कृष्णः समस्तप्रियकारकः ॥ नंदो नंदी महानादी
मादी मादनकः किली॥५९॥मिली हिली गिली गो-
ली गोलो गोलालयो गुली ॥ गुगुली मारकी शाखी

वटः पिप्पलकः कृती ॥ ६० ॥ म्लेच्छहा कालकर्ता च यशोदायश एव च ॥ अच्युतः केशवो विष्णुर्हरिः सत्यो जनार्दनः ॥ ६१ ॥ हंसो नारायणो नीलो लीनो भक्तिपरायणः ॥ जानकीवल्लभो रामो विरामो विघनाशनः ॥६२॥ सहस्त्रभानुर्महाभानुर्वीरभानुर्महोदधिः ॥ समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ॥ ६३ ॥ गोकुलानंदकारी च प्रतिज्ञापरिपालकः ॥ सदारामः कृपारामो महारामो धनुर्धरः ॥ ६४ ॥ पर्वतः पर्वताकारो गयो गेयो द्विज-

प्रियः ॥ कमलाश्वतरो रामो रामायणप्रवर्तकः
॥ ६५ ॥ द्यौर्दिवो दिवसो दिव्यो भव्यो भावी
भयापहः ॥ पार्वतीभाग्यसहितो भर्ता लक्ष्मीवि-
लासवान् ॥ ६६ ॥ विलासी साहसी सर्वी गर्वी
गर्वितलोचनः ॥ मुरारिर्लोकधर्मज्ञो जीवनो जीव-
नांतकः ॥ ६७ ॥ यमो यमारियमनो यामी याम-
विधायकः ॥ वंशुली पांशुली पांशुः पांडुरर्जुनव-
ल्लभ. ॥ ६८ ॥ ललिता चंद्रिकामाली माली मालां-
बुजाश्रयः ॥ अंबुजाक्षो महायज्ञो दक्षश्चिंतामणिः

प्रभुः ॥ ६९ ॥ मणिर्दिनमणिश्चैव केदारो वदरि-
श्रयः ॥ वदरीवनसंप्रीतो व्यासः सत्यवतीसुतः
॥ ७० ॥ अमरारिनिहंता च सुधासिंधुविधूदयः ॥
चंद्रो रविः शिवः शूली चक्री चैव गदाधरः॥७१॥
श्रीकर्ता श्रीपतिः श्रीदः श्रीदेवो देवकीसुतः ॥
श्रीपतिः पुंडरीकाक्षः पद्मनाभो जगत्पतिः ॥७२॥
वासुदेवोऽप्रमेयात्मा केशवो गरुडध्वजः ॥ नाराय-
णः परंधाम देवदेवो महेश्वरः ॥ ७३ ॥ चक्रपाणिः
कलापूर्णो वेदवेद्यो दयानिधिः ॥ भगवान् सर्वभू-

तेशो गोपालः सर्वपालकः ॥ ७४ ॥ अनंतो निर्गु-
णो नेता निर्विकल्पो निरंजनः ॥ निराधारो निरा-
कारो निराभासो निराश्रयः ॥ ७५ ॥ पुरुषः प्रण-
वातीतो मुकुंदः परमेश्वरः ॥ क्षणावनिः सार्वभौमो
वैकुंठो भक्तवत्सलः ॥ ७६ ॥ विष्णुर्दामोदरः कृष्णो
माधवो मथुरापतिः ॥ देवकीगर्भसंभूतो यशोदा-
वत्सलो हरिः ॥ ७७ ॥ शिवः संकर्षणः शंभुर्भूत-
नाथो दिवस्पतिः ॥ अव्ययः सर्वधर्मज्ञो निर्मलो
निरुपद्रवः ॥ ७८ ॥ निर्वाणनायको नित्यो नील-

जीमूतसन्निभः॥ कलाक्षयश्च सर्वज्ञः कमलारूपत-
त्परः ॥ ७९ ॥ हृषीकेशः पीतवासो वसुदेवप्रिया-
त्मजः ॥ नंदगोपकुमारार्यो नवनीताशनो विभुः
॥ ८० ॥ पुराणः पुरुषः श्रेष्ठः शंखपाणिः सुविक्र-
मः॥अनिरुद्धश्चक्ररथः शार्ङ्गपाणिश्चतुर्भुजः॥८१॥
गदाधरः सुरार्तिघ्नो गोविंदो नंदकायुधः ॥
वृंदावनचरः शौरिर्वेणुवाद्यविशारदः ॥ ८२ ॥
तृणावर्तांतको भीमः साहसो बहुविक्रमः॥शकटा-
सुरसंहारी बकासुरविनाशनः ॥८३॥ धेनुकासुर-

संघातः पूतनारिर्नृकेसरी ॥ पितामहो गुरुः साक्षी
प्रत्यगात्मा सदाशिवः ॥ ८४ ॥ अप्रमेयः प्रभुःप्रा-
ज्ञो प्रतर्क्यस्वप्नवर्धनः ॥ धन्यो मान्यो भवो भावो
धीरः शांतो जगद्गुरुः ॥ ८५ ॥ अंतर्यामी-
श्वरो दिव्यो दैवज्ञो देवसंस्तुतः ॥ क्षीराब्धिशय-
नो धाता लक्ष्मीवान् लक्ष्मणाग्रजः ॥ ८६ ॥ धा-
त्रीपतिरमेयात्मा चंद्रशेखरपूजितः ॥ लोकसाक्षी
जगच्चक्षुः पुण्यचारित्रकीर्तनः ॥ ८७ ॥ कोटिमन्म-
थसौंदर्यो जगन्मोहनविग्रहः ॥ मंदस्मिताननो गोपो

गोपिकापरिवेष्टितः ॥८८॥ फुल्लारविंदनयनश्चाणू-
रांध्रिनिषूदनः॥ इंदीवरदलश्यामो बर्हिबर्हावतंस-
कः ॥ ८९ ॥ मुरलीनिनदाल्हादो दिव्यमाल्यांबरा-
वृतः ॥ सुकपोलयुगः सुभ्रूयुगलः सुललाटकः ॥
॥ ९०॥ कंबुग्रीवो विशालाक्षो लक्ष्मीवान् शुभल-
क्षणः ॥पीनवक्षाश्चतुर्बाहुश्चतुर्मूर्तिस्त्रिविक्रमः॥९१
कलंकरहितः शुद्धो दुष्टशत्रुनिबर्हणः ॥ किरीटकुं-
डलधरः कटकांगदमंडितः ॥ ९२ ॥ मुद्रिकाभर-
णोपेतः कटिसूत्रविराजितः ॥ मंजीररंजितपदः

सर्वाभरणभूषितः ॥ ९३ ॥ विन्यस्तपादयुगलो
दिव्यमंगलविग्रहः ॥ गोपिकानयनानंदः पूर्णचंद्र-
निभाननः ॥ ९४ ॥ समस्तजगदानंदः सुंदरो
लोकनंदनः ॥ यमुनातीरसंचारी राधामन्मथवैभवः
॥९५॥ गोपनारीप्रियो दांतो गोपीवस्त्रापहारकः ॥
शृंगारमूर्तिः श्रीधामा तारको मूलकारणं ॥ ९६ ॥
सृष्टिसंरक्षणोपायः क्रूरासुरविभंजनः ॥ नरकासुर-
संहारी मुरारिर्वैरमर्दनः ॥ ९७ ॥ आदितेयप्रियो
दैत्यभीकरो यदुशेखरः ॥ जरासंधकुलध्वंसी कं-

सारातिः सुविक्रमः ॥९८॥ पुण्यश्लोकः कीर्तनीयो
यादवेंद्रो जगन्नुतः ॥ रुक्मिणीरमणः सत्यभामा-
जांबवतीप्रियः ॥ ९९ ॥ मित्रविंदानाग्नजितील-
क्ष्मणासमुपासितः ॥ सुधाकरकुले जातोनंतः प्रब-
लविक्रमः ॥२००॥ सर्वसौभाग्यसंपन्नो द्वारकाप-
ट्टनस्थितः ॥ भद्रासूर्यसुतानाथो लीलामानुषवि-
ग्रहः ॥ १ ॥ सहस्रषोडशस्त्रीशो भोगमोक्षैकदाय-
कः ॥ वेदांतवेद्यसंवेद्यो वैद्यो ब्रह्मांडनायकः ॥ २ ॥
गोवर्द्धनधरो नाथः सर्वजीवदयापरः ॥ मूर्तिमान्

सर्वभूतात्मा आर्तत्राणपरायणः ॥ ३ ॥ सर्वज्ञः
सर्वसुलभः सर्वशास्त्रविशारदः ॥ षड्गुणैश्वर्यसंप-
न्नः पूर्णकामो धुरंधरः ॥ ४ ॥ महानुभावः कैव-
ल्यदायको लोकनायकः ॥ आदिमध्यांतरहितः
शुद्धसात्विकविग्रहः ॥ ५ ॥ असमानसमस्तात्मा
शरणागतवत्सलः ॥ उत्पत्तिस्थितिसंहारकारणं
सर्वकारणं ॥ ६ ॥ गंभीरः सर्वभावज्ञः सच्चिदानं-
दविग्रहः॥विष्वक्सेनः सत्यसंधः सत्यवाक्सत्यवि-
क्रमः ॥ ७ ॥ सत्यव्रतः सत्यसंज्ञः सत्यधर्मपराय-

णः ॥ आपन्नार्तिप्रशमनो द्रौपदीमानरक्षकः ॥८॥
कंदर्पजनकः प्राज्ञो जगन्नाटकवैभवः ॥ भक्तवश्यो
गुणातीतः सर्वैश्वर्यप्रदायकः ॥ ९ ॥ दमघोषसु-
तद्वेपी वाणवाहुविखंडनः ॥ भीष्मभक्तिप्रदो दि-
व्यः कौरवान्वयनाशनः ॥ १० ॥ कौंतेयप्रियवंधुश्च
पार्थस्यंदनसारथी ॥ नारसिंहो महावीरः स्तंभ-
जातो महावलः ॥ ११ ॥ प्रल्हादवरदः सत्यो देव-
पूज्यो भयंकरः॥उपेंद्र इंद्रावरजो वामनो वलिवंध-
नः ॥ १२ ॥ गजेंद्रवरदः स्वामी सर्वदेवनमस्कृतः ॥

शेषपर्यंकशयनो वैनतेयरथो जयी ॥ १३ ॥
अव्याहतबलैश्वर्यसंपन्नः पूर्णमानसः ॥ योगेश्वरे-
श्वरः साक्षी क्षेत्रज्ञो ज्ञानदायकः ॥ १४ ॥ योगि-
हृत्पंकजावासो योगमायासमन्वितः ॥ नादबिंदु-
कलातीतश्चतुर्वर्गफलप्रदः ॥ १५ ॥ सुषुम्नामा-
र्गसंचारी देहस्यांतरसंस्थितः ॥ देहेंद्रियमनःप्रा-
णसाक्षी चेतःप्रसादकः ॥ १६ ॥ सूक्ष्मः सर्वगतो
देही ज्ञानदर्पणगोचरः ॥ तत्वत्रयात्मको व्यक्तः
कुंडलीसमुपाश्रितः ॥ १७ ॥ ब्रह्मण्यः सर्वधर्मज्ञः

शांतो दांतो गतक्लमः ॥ श्रीनिवासः सदानंदी विश्वमूर्तिर्महाप्रभुः ॥ १८ ॥ सहस्त्रशीर्षा पुरुषः हस्स्त्राक्षः सहस्त्रपात् ॥ सहस्त्रभुवनाधारः समस्तप्राणरक्षकः ॥ १९ ॥ समस्तः सर्वभावज्ञो गोपिकाप्राणवल्लभः ॥ नित्योत्सवो नित्यसौख्यो नित्यश्रीर्नित्यमंगलं ॥ २० ॥ व्यूहार्चितो जगन्नाथः श्रीवैकुंठपुराधिपः ॥ पूर्णानंदघनीभूतो गोपवेषधरो हरिः ॥ २१ ॥ कलापकुसुमश्यामः कोमलः शांतिविग्रहः ॥ गोपांगनावृतोनंतो वृंदा-

रण्यसमाश्रयः ॥ २२ ॥ वेणुवाद्यरतः श्रेष्ठो देवा-
नां हितकारकः ॥ बालक्रीडासमासक्तो नवनीतस्य
तस्करः ॥ २३ ॥ गोपालकामिनीजारश्चौरजार-
शिखामणिः ॥ परंज्योतिः पराकाशः परवासः
परिस्फुटः ॥ २४ ॥ अष्टादशाक्षरो मंत्रो व्यापको
लोकपावनः ॥ सप्तकोटिमहामंत्रशेखरो देवशेखरः
॥२५॥ विज्ञानज्ञानसंधानस्तेजोराशिर्जगत्पतिः ॥
भक्तलोकप्रसन्नात्मा भक्तमंदारविग्रहः ॥ २६ ॥
भक्तदारिद्र्यदमनो भक्तानां प्रीतिदायकः ॥ भक्ता-

धीनमनाः पूज्यो भक्तलोकशिवंकरः ॥२७॥ भक्ता-
भीष्टप्रदः सर्वभक्ताघौघनिकृंतनः ॥ अपारकरुणा-
सिंधुर्भगवान् भक्ततत्परः ॥ २८ ॥ वृंदारकजन-
श्लाघी कालिंदीजलपावनः ॥ ब्रह्मण्यदेवो देवेशो
दत्तात्रेयो दिवरुपतिः ॥ २९ ॥ वेदव्यासः शुभा-
चारो जनकज्ञानदायकः ॥ वाराहः पुंडरीकाक्षो
हिरण्याक्षविदारकः ॥ ३० ॥ नृसिंहः सिंहविक्रांतः
कृतप्रह्लादरक्षणः ॥ हिरण्यकशिपूत्पाटकेलिल-
क्ष्मीलतांचितः ॥ ३१ ॥ ब्रह्मादिदेवतावृंदगाय-

त्रीजपतत्परः ॥ बालकेलिर्बाललीलामोहिताशेष-
भूपतिः ॥ ३२ ॥ प्रातःस्मरणसद्युक्तो नित्यस्नान-
विधिप्लुतः ॥ कामगायत्रिकापूतः कामगायत्रिस-
त्कृतः ॥ ३३ ॥ गायत्रीजपनिष्ठानां मनोरथवरप्र-
दः ॥ जगद्वशीकरणभूर्जगदानंदकंदलः ॥ ३४ ॥
मंत्रशास्त्रप्रियो मोही मंत्रशास्त्रविशारदः ॥ मंत्र-
शास्त्रैकनिलयो मंत्रशास्त्रफलप्रदः ॥ ३५ ॥ मंत्र-
शास्त्रक्रियादक्षो मंत्रशास्त्रनिषेवितः ॥ मंत्रशास्त्र-
गुणोन्मादी श्रीविद्यादिमुखास्पदः ॥ ३६ ॥ गोपाल-

सुंदरीप्राणो नृसिंहः सुंदरीस्तुतः ॥ दिग्बंधमंत्रर-
चितो भूतशुद्धिविशारदः ॥३७॥ कृतप्राणप्रतिष्ठां-
गो मातृकान्यासतत्परः ॥ केशवादिकृतन्यासो मू-
लमंत्रपुरस्कृतः ॥ ३८॥ अंआं इंईं कृताटोप उंऊंऋं
ॠंतथैवच ॥ ऌंॡंचस्वरसंदोह एंऐंबीजकृता-
स्पदः ॥ ओंऔंअंअः पूज्यपदः षोडशस्वरमंडितः
॥३९॥कंखंगंघंङमीशानः चंछंजंझंञमीस्वरः ॥टं-
ठंडंढंणमानंदी तंथंदंधंनमावृतः ॥ ४० ॥ पंफंबं-
भंममाधारो यंरंलंवंसवत्सलः ॥ शंषंसंहंप्रजा-

नाथो लंक्षंश्रीमातृकामयः ॥४१॥ मातृकामालया
जाप्यो भूतलिप्यापुटीकृतः ॥ सुप्तप्रबोधसंस्कारो
रसिको रससागरः ॥ ४२ ॥ ग्लौंबीजवेदिताग्लौं-
ग्लौं गण्यो गणपतिप्रियः ॥ धंधंधनेशो धनदो
धरानायकपूजितः ॥ ४३ ॥ द्रांद्रींक्लींक्लंसः पंचबा-
णेशोऽज्झखप्रेंगुरुत्तमः ॥ हसक्षमलवरयूंगुरुपूजा-
परायणः ॥ ४४ ॥ गांगींगूंगैंचगौंगः श्रीगंगादि-
कृतपूजनः ॥ रांरींरूंरैं च रौंरः श्रीहुताशनवरप्रदः
॥४५॥ लांलींलूंलैं च लौंलः श्रीभूभारोद्धारणक्षमः॥

वांवींवूंवं च वौंवः श्रीपयसामादिभूर्विभुः ॥ ४६ ॥
यांयींयूंयं च यौंयः श्रीवायुवृंदनिषेवितः ॥ ह्रांह्रीं-
ह्रूंह्रें च ह्रौंह्रः श्रीव्योमावासो जगन्मयः ॥४७॥
त्रांत्रींत्रूंतारकब्रह्म क्रांक्रींक्रूंकृष्णविग्रहः ॥ ह्रांह्रीं-
ह्रूंहरिरित्युक्तो म्रांम्रींम्रूंमारितासुरः ॥ ४८ ॥
श्रांश्रींश्रूंशिशुपालघ्नो भ्रांभ्रींभ्रूंभयभंजनः ॥ ज्रां-
ज्रींज्रूं त्रिजगन्नाथः चांचींचूं चंडिकामयः ॥ ४९ ॥
प्रांप्रींप्रूंपार्वतीप्राणः स्त्रांस्त्रींस्त्रूं च सुदर्शनः ॥
ऌांऌींऌूंलिपिविन्यासः केशवादिविधायकः ॥५० ॥

नाथो लंक्षंश्रीमातृकामयः ॥४१॥ मातृकामालया
जाप्यो भूतलिप्यापुटीकृतः ॥ सुप्तप्रबोधसंस्कारो
रसिको रससागरः ॥ ४२ ॥ ग्लौंबीजवेदिताग्लौं-
ग्लौं गण्यो गणपतिप्रियः ॥ धंधंधनेशो धनदो
धरानायकपूजितः ॥ ४३ ॥ द्रांद्रींक्लींक्लंसः पंचबा-
णेशोज्झखप्रेंगुरुत्तमः ॥ हसक्षमलवरयूंगुरुपूजा-
परायणः ॥ ४४ ॥ गांगींगूंगैंचगौंगः श्रीगंगादि-
कृतपूजनः ॥ रांरींरूंरैं च रौंरः श्रीहुताशनवरप्रदः
॥४५॥ लांलींलूंलैं च लौंलः श्रीभूभारोद्धारणक्षमः॥

वांवींवूंवें च वौंवः श्रीपयसामादिभूर्विभुः ॥ ४६ ॥
यांयींयूंयें च यौंयः श्रीवायुवृंदनिषेवितः ॥ ह्रांह्रीं-
ह्रूंह्रैं च ह्रौंह्रः श्रीव्योमावासो जगन्मयः ॥४७॥
त्रांत्रींत्रूंतारकब्रह्म क्रांक्रींक्रूंकृष्णविग्रहः ॥ ह्रांह्रीं-
ह्रूंहरिरित्युक्तो म्रांम्रींम्रूंमारितासुरः ॥ ४८ ॥
श्रांश्रींश्रूंशिशुपालघ्नो भ्रांभ्रींभ्रूंभयभंजनः ॥ ज्रां-
ज्रींज्रूं त्रिजगन्नाथः च्रांच्रींच्रूं चंडिकामयः ॥ ४९ ॥
प्रांप्रींप्रूंपार्वतीप्राणः स्रांस्रींस्रूं च सुदर्शनः ॥
ल्रांल्रींल्रूंलिपिविन्यासः केशवादिविधायकः ॥५०॥

लक्ष्मीनारायणो देवः शक्तिंश्रींकामपूर्वकः ॥
ह्रींश्रींक्लींआंकीर्तियुक्तः केशवः क्लेशनाशनः॥५१॥
ह्रींश्रींक्लींआंकांतियुक्तो नारायण उदारधीः ॥
ह्रींश्रींक्लींइं तुष्टियुक्तो माधवः पद्मभूस्तुतः ॥५२॥
ह्रींह्रींश्रींक्लींइंपुष्टियुक्तो गोविंदा गरुडध्वजः ॥
ह्रींश्रींक्लींउंधृतिप्रोक्तो विष्णुर्वैकुंठमंदिरः ॥ ५३ ॥
ह्रींश्रींक्लींऊंशांतियुक्तो मधुहा मधुसूदनः ॥
ह्रींश्रींक्लींऋंक्रियापूर्वं त्रिविक्रम इतीरितः ॥ ५४ ॥
ह्रींश्रींक्लींॠंदयादिव्यो वामनो बलिपूजितः ॥

ह्रींश्रींक्लींलृं मेधया युक् श्रीधरः श्रीविभूषणः
॥५५॥ ह्रींश्रींक्लींलॄं हृषीकेशो हर्षयासमलंकृतः ॥
ह्रींश्रींक्लींएंपद्मनाभः श्रद्धाशक्तिसमन्वितः ॥५६॥
ह्रींश्रींक्लींऐंलज्जयायुक् श्रीमान् दामोदरः प्रभुः ॥
ह्रींश्रींक्लींओंवासुदेवो महालक्ष्मीकृतार्हणः॥५७॥
ह्रींश्रींक्लींऔं सरस्वत्या युक्तः संकर्षणो बली ॥
ह्रींश्रींक्लींअंप्रीतियुक्तः प्रद्युम्नः प्रणयप्रदः ॥५८॥
ह्रींश्रींक्लींअः सानिरुद्धो रत्यालिंगितपार्श्वकः ॥
ह्रींश्रींक्लींकंजया युक्तश्चक्री चक्रधरः प्रभुः ॥५९॥

ह्रींश्रींक्लींखं दुर्गया युक्तो गदी गदनिवर्हणः ॥
ह्रींश्रींक्लींगं प्रभायुक्तःशार्ङ्गी शार्ङ्गशरासनः॥६०॥
ह्रींश्रींक्लींघं सत्यया युक् खड्गी खड्गधरांशधृक् ॥
ह्रींश्रींक्लींङं चंडया युक् शंखी शंखनिधिप्रभुः॥६१
ह्रींश्रींक्लींचं हली वाणी भूषितो भयभंजनः ॥
ह्रींश्रींक्लींछं विलासिन्या युक्तो मुशलधृग्विभुः६२
ह्रींश्रींक्लींजं विजया युक्तः शूली शूलसनातनः ॥
ह्रींश्रींक्लींझं विरजया युक्तः पाशी पाशनिकृंतनः
॥६३॥ ह्रींश्रींक्लींञं विश्वया युगंकुशीच कुशलां-

चितः ॥ ह्रींश्रींक्लींटं विनयया मुकुंदो सुरमर्दनः
॥६४॥ ह्रींश्रींक्लींठं नंदसुतः सुनंदासमलंकृतः ॥
ह्रींश्रींक्लींडं स्मृतिप्राप्तो नंदी भुवननंदनः ॥६५॥
ह्रींश्रींक्लींढं ऋद्धियुक्तो नरो नारायणांकितः ॥
ह्रींश्रींक्लींणं नरकजित्समृद्धिपरिसेवितः ॥ ६६ ॥
ह्रींश्रींक्लींतं शुद्धियुक्तो हरिर्हर्षवशीकृतः ॥ ह्रीं-
श्रींक्लींथं बुद्धिभक्तः कृष्णः कलिमलापहः ॥ ६७ ॥
ह्रींश्रींक्लींदं सत्यशीलो भूत्यायुक्तो भयापहः ॥
ह्रींश्रींक्लींधं मतियुतः सात्वतः सात्विकार्चितः६८

॥७७॥ क्लांक्लींक्लौंक्लः कामदेवस्त्रैलोक्यवशकारकः॥
हक्लौंवासुदेवाय नमो मनोभवस्वरूपिणे ॥ ७८ ॥
हक्लींसंकर्षणाय नमो मकरध्वजमूर्तये ॥ हक्लूंप्रद्यु-
म्नाय नमो वालकंदर्परूपिणे ॥७९॥ हसक्लिमनिरु-
द्धाय मन्मथाय नमोनमः॥ हसक्लृंनारायणाय काम-
देवाय ते नमः ॥८०॥ मूलेन व्यापकं कृत्वा वासुदेवं
स्मरन् हृदि ॥ तावद्ध्यायेन्महेशानि यावत्तन्मयतां
व्रजेत् ॥ ८१ ॥ निश्चलत्वं यदा याति मनो ध्यानव-
शात्प्रिये॥तदा मंत्रस्य यंत्रस्य सिद्धिर्भवति नान्य-

था ॥ ८२ ॥ अल्पायासेन देवेशि साधयेत्स्वमनो-
रथान् ॥ स्वर्भूपाताललोकेषु यत्किंचिन्मनसेप्सितं
॥ ८३ ॥ तत्सर्वं जायते देवि साधकस्य वरानने ॥
प्राणापानेन वा कुर्यान्निश्चल्यं मनसः प्रिये ॥ ८४ ॥
इति गोपालदेवस्य रहस्यातिरहस्यकं ॥ नाम्नां सह-
स्रं देवेशि कथितं तव भक्तितः ॥ ८५ ॥ त्वं मे प्राणा-
धिका यस्मादिदं च प्राणतोधिकं ॥ तस्मात्ते गदितं
देवि सावधाना सुसाधय ॥ ८६ ॥ नेदं शठाय मूर्खा-
य कृपणाय दुरात्मने ॥ दांभिकाय कुशिष्याय देयं

सर्वांगसुंदरि ॥८७॥ विनीताय सुशिष्याय धीराय साधकाय च ॥ वैष्णवाय विशुद्धाय गोपालोपासकाय च ॥८८॥ गुरुसेवासमर्थाय गुरुसेवापराय ॥ गुरुं गोपालरूपेण पश्यतेऽभेदचक्षुषा ॥८९॥ देयं शांताय भक्ताय प्राणादपि प्रियाय च ॥ प्रकाशयेत्कुपात्रे यः स महामृत्युमाप्नुयात् ॥ ९० ॥ अनेन सदृशं देवि स्तोत्रं नास्ति महीतले ॥ यान्यान्मनोरथान्कृत्वा पठेत्तांस्तानवाप्नुयात् ॥ ॥ ९१ ॥ सर्वरोगप्रशमनमपमृत्युविनाशनं ॥ दी-

र्घायुष्यप्रदं देवि पुत्रपौत्रविवर्धनं ॥९२ ॥ पुत्रप्र-
दमपुत्राणामगतीनां गतिप्रदं ॥ वर्णत्रयेण देवेशि
पठनीयं परात्परम् ॥९३॥ तत्रापि ब्राह्मणैरेव
साधनीयं विशेषतः ॥ श्रवणाच्छूद्रजातीनामि-
दं निष्फलतां व्रजेत् ॥ ९४ ॥ विधिना प्रा-
तरुत्थाय स्नात्वा निर्मलमानसः ॥ संध्यादिकर्म
निर्वृत्य ततः पूजागृहं व्रजेत् ॥ ९५ ॥ उपविश्या-
सने तत्र भूतशुद्धिं समाचरेत् ॥ ततः प्राणान्प्रति-
ष्ठाप्य मातृकान्यासपूर्वकं ॥ ९६ ॥ मूलमंत्रस्य

विधिवन्न्यासान्कुर्यात्सुलोचने ॥ चक्रराजं सम-
भ्यर्च्यैत्पात्रस्थापनपूर्वकं ॥ १७ ॥ मूलमंत्रं जपे-
द्देवि सहस्रत्रितयं ततः ॥ रहस्यं नामसाहस्रं
पश्चाद्देवि पठेन्नरः ॥ १८ ॥ वारमेकं पठेद्यस्तु
सर्वपापक्षयो भवेत् ॥ नित्यकर्मस्वनुष्ठानात्पातकं
क्षयमाप्नुयात् ॥ ९९ ॥ वारद्वयं तु योधीते तस्य
पुण्यफलं शृणु ॥ गंगादिसर्वतीर्थेषु स्नातो भवति
सुव्रत ॥ २०० ॥ वारत्रयं तु योऽधीते पूजायाः
फलमाप्नुयात् ॥ कुरुक्षेत्रे स्वर्णदानाद्गंगातीरनिवा-

सतः ॥ १ ॥ निर्जले मरुभूदेशे प्रपादानाच्च
नित्यशः ॥ अविमुक्ते महाक्षेत्रे कोटिब्राह्मणभोज-
नात् ॥ २ ॥ कोटिलिंगप्रतिष्ठानाच्छ्वेतद्वीपे महे-
श्वरि ॥ यत्फलं जायते देवि तत्फलं पाठमात्रतः
॥ ३ ॥ महापातकपुंजानां नाशनं स्मरणादपि ॥
प्रदहेद्देवदेवेशि तूलराशिमिवानलः ॥ ४ ॥ पंचो-
पचारैः संपूज्य देवं श्रीपुरुषोत्तमं ॥ चतुर्वारं पठे-
देतत्पश्चान्नामसहस्रकं ॥ ५ ॥ सर्वे रोगाः प्रणश्यं-
ति दीर्घमायुश्च विंदति ॥ ज्वरार्तस्य शिरः स्पृष्ट्वा

पठेन्नामसहस्रकं ॥ ६ ॥ ज्वरः सद्यो विलीयेत शिरःशूलादिसंयुतः ॥ सर्वव्याधिनिवृत्त्यर्थं चंदनं चाभिमंत्रयेत् ॥ ७ ॥ पंचधा यः पठेदेतन्नामसाहस्रमुत्तमं ॥ ग्रहोपसर्गाः कृत्यादिबाधा नश्यंति तत्क्षणात् ॥ ८ ॥ वारषट्कं पठेद्यस्तु गोपालध्यानतत्परः ॥ वर्षमात्रेण देवेशि दरिद्रो धनमाप्नुयात् ॥ ९ ॥ पुत्रप्राप्त्यै तु वंध्यानां नवनीतं मनोरमं ॥ सप्तधा मंत्रितं दद्यात्पुत्रलाभो भवेद्ध्रुवं ॥ १० ॥ राजानं यो वशीकर्तुं चिंतयेन्मनसा शिवे ॥ सप्त-

वारं तदा जप्यात्तद्गेहाभिमुखं प्रिये ॥ ११ ॥ राजा-
नं वशयेत्क्षिप्रं नात्र कार्या विचारणा ॥ अष्टधा
यः पठेद्देवि षण्मासं विजितेंद्रियः ॥ १२ ॥ तन्मु-
खालोकमात्रेण मुह्येल्लोकत्रयं शिवे ॥ तस्मिन्त्रयो-
गान्ये कुर्युः शंकरप्राणवल्लभे ॥ १३ ॥ ते सुदर्श-
नचक्रेण चूर्ण्यंते नात्र संशयः ॥ अभिचारक्रियां
कुर्याद्यस्तस्मिन् साधकोत्तमे ॥ १४ ॥ तन्नारासिं-
हो भगवान् सद्यो हंति न संशयः ॥ नानेन सदृशं
स्तोत्रं त्रिलोक्यां वर्तते शिवे ॥ १५ ॥ नववारं

पठेद्यस्तु वृंदारण्ये विशेषतः ॥ यद्वा मधुवने देवि
वंशीवटतलेथवा ॥१६॥ कदंबवनमूले वा निष्का-
मो विजितेंद्रियः ॥ स षण्मासेन देवेशि कृष्णं
पश्यति चक्षुषा ॥ १७ ॥ एवं नवावृत्तिफलं कथि-
तं ते सुरेश्वरि ॥ नवावृत्त्या न साध्यं यत्तन्नास्त्येव
जगत्त्रये ॥ १८॥ वसन् वृंदावने रम्ये यमुनाकुंज-
भूगतः ॥ पद्मैर्वा तुलसीपुष्पैश्चंपकैर्वा कदंबकैः
॥ १९ ॥ शालग्रामशिलां योर्चैन्नाममंत्रैरतंद्रितः ॥
चतुर्थीनमसायुक्तैस्तारकामः श्रिया युतैः ॥ २० ॥

ॐ क्लींश्रीं देवाय नमः ॥ ॥एवं सर्वाणि १००० नामानि कृत्वा शालग्रामशिलां पूजयेदुक्तफलदो भवति ॥ न शक्नोमि फलं तस्य वक्तुं वर्षशतैरपि॥
सर्वक्रतुफलं लब्ध्वा सर्वकामानवाप्नुयात् ॥२१ ॥
षण्मासमाचरेद्यस्तु विधिमेनं शुचिस्मिते ॥ प्रत्यक्षीभूय कृष्णोस्मै वरं यच्छति कामितं ॥ २२ ॥
न पुनर्जायते योनौ मरणं नास्ति चापरं ॥
कोटिजन्मार्जितं पापं त्यक्त्वा वैकुंठमाप्नुयात्॥२३॥
रहस्यं नामसाहस्रं निष्कामं यो जपेच्छिवे ॥ ब्रह्म-

ज्ञानमवाप्नोति येन. मुच्येत बंधनात् ॥ २४ ॥
धनार्थी धनमाप्नोति यशोर्थी लभते यशः ॥ विद्या-
र्थी प्राप्नुयाद्विद्यां पुत्रार्थी लभते सुतान् ॥ २५ ॥
स्तोत्रेणानेन देवेशि नित्यं पूजाफलं लभेत् ॥
बहूनां जन्मनामंते गोपालोपासको भवेत् ॥ २६ ॥
नामसाहस्रपाठश्च तत्राप्यतिसुदुर्लभः ॥ विरला
एव लोकेस्मिन् वैष्णवाचारवेदिनः ॥ २७ ॥ तत्रा-
पि विरला देवि नामसाहस्रपाठकाः ॥ २८ ॥ विना
नामसहस्रं यस्तोषयेत्पुरुषोत्तमं ॥ २९ ॥ लोचना-

भ्यां विहीनः स रूपं पश्यति दुर्मतिः॥रहस्यं नाम-
साहस्रं त्यक्त्वा यः सिद्धिकामुकः॥ ३० ॥स सोपा-
नपथं त्यक्त्वा गच्छेदूर्ध्वं विमूढधीः॥ अयुतं यः पठे-
देतत् षण्मासेन समाहितः ॥३१॥ स सर्वाः संपदो
यायादंते मुक्तिमवाप्नुयात् ॥ संक्रांतौ विषुवे चैव
गुरोर्जन्मदिने तथा ॥३२॥द्वादश्यां पौर्णिमायां च
ग्रहणे चंद्रसूर्ययोः ॥ यः पठेत्प्रयतो देवि तस्य
पापक्षयो भवेत्॥ ३३॥ रासोत्सवे महादेवि पौर्ण-
मास्याममंदधीः ॥ पठेत्समाहितमनाः सर्वसिद्धिं

स विंदति॥३४॥ इति श्रीराधिकानाथसहस्रं नाम कीर्तितं ॥ स्मरणात्पापराशीनां खंडनं मृत्युनाशनं ॥ ३५ ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ परद्रव्यापहरणं परद्वेषसमन्वितं ॥३६ ॥ मानसं वाचिकं कायं यत्पापं पापसंभवं॥सहस्रनामपठना-त्सर्वं नश्यति तत्क्षणात् ॥ ३७॥ महादारिद्र्ययुक्तो यो वैष्णवो विष्णुभक्तिमान् ॥ कार्तिक्यां यः पठे-द्रात्रौ शतमष्टोतरं सुधीः ॥३८॥ पीतांबरधरः श्री-मान्सुगंधिपुष्पचंदनैः॥ पुस्तकं पूजयेद्देवि नैवेद्या-

ह्युपचारकैः ॥ ३९ ॥ तुलसीमालया युक्तो वैष्णवं पूजयेन्निशि ॥ पठेत्सहस्रनामाख्यं ततः सिद्धिः प्रजायते ॥ ४० ॥ महानिशायां सततं वैष्णवो यः पठेत्सदा ॥ देशांतरगता लक्ष्मीः समायाति न संशयः ॥ ४१ ॥ त्रैलोक्ये च महादेवाः सुंदर्यः काममोहिताः ॥ मुग्धाः स्वयं समायांति वैष्णवं च भजंति ताः ॥ ४२ ॥ रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बंधनात् ॥ गुर्विणी जनते पुत्रं कन्या विंदति सत्पतिं ॥ ४३ ॥ राजानो वश्यतां यांति किं

पुनः क्षुद्रमानुषाः ॥ सहस्रनामपठनाच्छ्रवणात्पू-
जनात्प्रिये ॥ ४४ ॥ धारणात्सर्वमाप्नोति वैष्णवो
नात्र संशयः ॥ वंशीवटे चान्यवटे तथाश्वत्थस्य
मूलके ॥ ४५ ॥ कदंबपादपतले श्रीगोपालस्य
संनिधौ ॥ यः पठेद्वैष्णवो नित्यं स याति हरिमं-
दिरं ॥ ४६ ॥ यद्गृहे पुस्तकं देवि पूजितं परिति-
ष्ठति ॥ न मारी न च दुर्भिक्षं नोपसर्गभयं भवेत्
॥ ४७॥ सर्वे भूतपिशाचाद्याः पलायंतेतिदूरतः॥
श्रीगोपालो महादेवि वसेत्तस्य गृहे सदा ॥ ४८ ॥

मथुरायां महाक्षेत्रे तथा मंदरकानने ॥ वृंदावने
द्वारकायां गोकुले नंदपत्तने ॥ ४९ ॥ गोवर्धनगि-
रौ रम्ये तुलसीकानने तथा ॥ समुद्रगानदीतीरे
कालीयन्हदसन्निधौ ॥ ५० ॥ वैंकटे रंगनाथे च
बदर्याश्रममंडले ॥ वाराणस्यां प्रयागे च जगन्ना-
थाश्रमे तथा ॥ ५१ ॥ यत्र कुत्रापि देवेशि जान्ह-
वीयमुनातटे ॥ पुण्येषु गंगाद्वारादिक्षेत्रेषु वरव-
र्णिनि ॥ ५२ ॥ यः साधयेदिदं स्तोत्रं श्रीगोपालै-
कतानवाक् ॥ स सर्वसंपदो लब्ध्वा यात्यंते वैष्णवं

पदं ॥ ५३ ॥ श्रीवृंदावनचंद्रेण पुरेदं रासमंडले ॥
राधायै गदितं भद्रे तथा वै नारदाय च ॥ ५४ ॥
नारदाल्लब्धवान्देवि दुर्वासा मुनिसत्तमः ॥ ममा-
वतारो लोकेषु यो रुद्र इति कीर्तितः ॥ ५५ ॥
तेन प्रोक्तं वसिष्ठाय वसिष्ठेन प्रकाशितं ॥ एवं
परांपराप्राप्तं विरला वैष्णवा जनाः ॥ ५६ ॥ कलौ
जानंति देवेशि मया तुभ्यं प्रकाशितं ॥ गोपनीयं
त्वया देवि यदि चेत्सिद्धिमिच्छसि ॥ ५७ ॥ प्रा-
णादप्यधिकं देवि मम पादौ स्पृशामि ते ॥ गोप-

नीयं गोपनीयं गोपनीयं प्रयत्नतः ॥ ३५८ ॥
इति श्रीसंमोहनाख्ये महातंत्रे पार्वतीश्वरसंवादे
गोपालसहस्रनामस्तोत्रं समाप्तम् ॥
अथ गोपालस्तवराजस्तोत्रम् ॥ ॐअस्य श्रीगो-
पालस्तोत्रमंत्रस्य ॥ नारद ऋषिः ॥ अनुष्टुप्छंदः॥
श्रीकृष्णः परमात्मा देवता ॥ श्रीकृष्णप्रीत्यर्थं जपे
विनियोगः ॥ ॥ अथ ध्यानं ॥ सजलजलदनीलं
दर्शितोदारशीलं करतलधृतशैलं वेणुनादे रसालं॥
व्रजजनकुलपालं कामिनीकेलिलोलं तरुणतुल-

सिमालं नौमि गोपालवालं ॥ १॥ ॥ नारद उ-
वाच ॥ नवीननीरदश्यामं नीलेंदीवरलोचनं ॥
वल्लवीनंदनं वंदे कृष्णं गोपालरूपिणं ॥ २ ॥ स्फु-
रद्बर्हदलोद्बद्धनीलकुंचितमूर्धजं ॥ कदंबकुसुमोद्भा-
सि वनमालाविभूषितं ॥ ३॥ गंडमंडलसंसर्गिच-
लत्कांचनकुंडलं ॥ स्थूलमुक्ताफलोदारहारोद्योति-
तवक्षसं ॥ ४ ॥ हेमांगदतुलाकोटिकिरीटोज्ज्वल-
विग्रहं ॥ मंदमारुतसंक्षोभिवलितांबरसंचयं ॥ ५ ॥
रुचिरौष्ठपुटन्यस्तवंशीमधुरनिःस्वनैः ॥ लसद्गो-

पालिकाचेतो मोहयंतं मुहुर्मुहुः ॥६॥वल्लवीवदनां-
भोजमधुपानमधुव्रतं ॥क्षोभयंतं मनस्तासां सस्मे-
रापांगवीक्षणैः॥७॥यौवनोद्भिन्नदेहाभिः संसक्ताभि
परस्परं ॥ विचित्रांवरभूषाभिर्गोपनारीभिरावृतं
॥ ८ ॥ प्रभिन्नांजनकालिंदीजलकेलिकलोत्सुकं ॥
योधयंतं क्वचिद्गोपान् व्याहरंतं गवां गणं ॥ ९ ॥
कालिंदीजलसंसर्गिशीतलानिलकंपिते ॥ कदंब-
पादपच्छाये स्थितं वृंदावने क्वचित् ॥ १० ॥ रत्न-
भूधरसंलग्नरत्नासनपरिग्रहं ॥ कल्पपादपमध्यस्थं

हेममंडपिकागतं ॥११॥ वसंतकुसुमामोदसुरभी-
कृतदिङ्मुखे ॥ गोवर्धनगिरौ रम्ये स्थितं रासर-
सोत्सुकं ॥ १२ ॥ सव्यहस्ततले न्यस्तगिरिवर्या-
तपत्रकं ॥ खंडिताखंडलोन्मुक्तमुक्तासारघनाघनं
॥ १३ ॥ वेणुवाद्यमहोल्लासकृतहुंकारनिःस्वनैः ॥
सवत्सैरुन्मुखैः शश्वद्गोकुलैरभिवीक्षितं ॥ १४ ॥
कृष्णमेवानुगायद्भिस्तच्चेष्टावशवर्तिभिः ॥ दंडपा-
शोद्यतकरैर्गोपालैरुपशोभितं ॥ १५ ॥ नारदा-
द्यैर्मुनिश्रेष्ठैर्वेदवेदांगपारगैः ॥ प्रीतिसुस्निग्धया

ध्यात्वा स्तुगणानं परात्परं ॥ १६ ॥ य एवं चिंत-
येन्नित्यं भक्त्या संस्तौति मानवः ॥ त्रिसंध्यं तस्य
तुष्टोसौ ददाति मनसीप्सितं ॥१७॥ राजानोभग-
तानेति परमसर्वजनप्रियः ॥ अचलां श्रियमाप्नोति
स याम्यी जायते ध्रुवं ॥१८॥ इति श्रीगौतमरि-
षिप्रोक्तं गाणपत्यगुणमणिरत्नराजः संपूर्णः ॥

इदं पुस्तकं श्रीगणपत्यशरणगोस्वामितोलस्वामगी
श्यामजरिभगवेनाप्रुगानिर्णयसागरा
ख्यमुद्रणालयेमुद्रयित्वाप्रकाशितम् ।

पुस्तक मिलनेका ठिकाणाः-
मुंबई-कालकादेवीरोड हरिप्रसाद्
भगीरथ पुस्तकालय.
कानपुर-हनुमानदास ब्रजवल्लभकी
दुकानमें.
हरिप्रसाद् भगीरथ.
कालकादेवीरोड.
मुंबई.

श्री

श्रीमद्वेदमार्गप्रतिष्ठापनाचार्यपुष्करपीठस्थश्रीमन्निम्बा-
र्काचार्यश्रीघनश्यामशरणदेवाज्ञया तच्छिष्येण भगीर-
थात्मजहरिप्रसादेन मोहमय्याख्यपत्तने निर्णयसाग-
राख्यमुद्रणालये मुद्रयित्वा प्रसिद्धिं नीतः ।